CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.18P.13

Coll. No. 172

Title Tarkaparibhāṣā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 172 Subject: Nyāya

Title: Tarkaparibhāṣā

Author: Keśavamiśra Scribe: —

Date of the work: — Date of the Ms.: V.S. 1521

Place of the work: — Place of the Ms.: —

Size: 10" by 4.5" Extent: 24 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks:

वा नियता अनन्यथासिद्धस्य तत्कारणं । यथा तंतुतुरीवेमादिकं पटस्य । यद्यपि पटे त्वसौ रासभादेर्दैवादागतस्य सत्त्वं नि
विद्यते तथापि नासौ नियतः । तंतुरूपस्य नियतपूर्वभावित्वेप्यन्यथासिद्धिः । किंच यथासिद्धः पटरूपजनकतयोपक्षीणत्वात् । पटं प्रत्यपि
कारणत्वे कल्पनागौरवात् । अतएवानन्यथासिद्धनियतपूर्ववर्तित्वं कारणत्वं । अनन्यथासिद्धनियतपश्चाद्भावित्वं कार्यत्वं
। यत्तु कश्चिदादौ कार्यमुक्तं तदयुक्तं पर्यायातिरिक्त्वं कारणं निरूपितं तद्युक्तं । नित्यविभूनां व्योमादीनां कारणता दर्शयति त्रि
कारणं तत्वेनाकारणत्वप्रसंगात् तत्कारणं त्रिविधं । समवाय्यसमवायिनिमित्तभेदात् । तत्र यत्समवेतं कार्यमु
त्पद्यते तत्समवायिकारणं । यथा तंतवः पटस्य समवायिकारणं । तंतुष्वेव हि पटः समवायेन जायते नान्यत्रेत्यादि
तंतुषु तंतुसंबंधस्तु यादि संबंधोपि पटस्य कथं तंतुष्वेव समवेतो जायते तन्तुर्याद्विविधः सत्वा । द्विविधः
संबंधः संयोगः समवायश्चेति । तत्रायुतसिद्धयोः संबंधः समवायः । अन्ययोर्द्वयोस्तु संयोग एवेत्ययुतसि
द्धौ ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । तदुक्तं तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययो
र्द्वयोः । अवश्यमेकमपराश्रितमेवावतिष्ठते तौ यथावयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती
विशेषनित्यद्रव्ये चेति । अवयवावयविनौ हि यथाक्रममवयवावयव्याश्रितावेवावतिष्ठेते अविनश्यन्तौ । विनश्यदवस्थस्तु
नाश्रितोऽवतिष्ठते । यथा तंतुनाशे सति पटः । यथा वा आश्रयनाशे सति गुणः । विनश्यदवस्थस्तु विनाशकारणसामग्री
विनाशे संयोगनिकारणानि [illegible] संबंधेन [illegible] इत्यर्थः ॥ २

पश्चात्रपाति ॥

पूर्वेयापरं वक्षादीप्सितयोर्गीवः पौर्वापर्ये ॥ ६ × अयुतसिद्धत्वं च तंतुपरिहारेणापटस्थानवस्थानात् ॥ १

तर्कभा° सोऽभिधीयते तंतुपटावुभवयवावयविनौ तेन तयोः संबंधः समवायः अयुतसिद्धत्वात् ॥ द्वयोरपि ययोस्तु समवायः ॥ अयुतसि

२ द्धत्वाच्च ॥ नहि तंतुरहितः पटोस्ति तंतवएवावतिष्ठति ना पि पटस्तुर्याश्रितावायुतसिद्धत्वं तयोः पृथग्भावस्यादर्शनात् ॥ अतस्त

योः संयोग एवा तथा च तंतुसमवेतः पटः यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं ॥ अतस्तंतव एव समवायि

कारणं पटस्य न तुर्यादिः ॥ पटश्च स्वगतरूपादेः समवायिकारणं ॥ एवं घटावयवोपि घटस्य समवायिकारणं ॥ घटश्च स्व

गतरूपादेः ॥ तत्र यदि घटादयो द्रव्याणि यंत्रा देव तत्र तद्रूपादयो गुणास्तत्समानकालीना एव तद्गुणिनः स्युस्तै

विषाणवत्कार्यकारणभाव एव न स्यात् ॥ अतो रूपादीनामपि न समवायिकारणं घटादीनां कारण

विशेषत्वात्समवायिकारणत्वं न स्यात् ॥ तत्र गुणिनः समानकालीनं जन्म किं तु द्रव्यं निर्गुणमेव प्रथमक्षणे उत्पद्यते

पश्चात्समवायिगुणा उत्पद्यंते समकालोत्पत्तौ गुणगुणिनोः समानसामग्रीकत्वाद्भेदो न स्यात् ॥ कारणभेदनियमा

त् कार्यभेदस्य तस्मात्प्रथमक्षणे निर्गुण एव घटोत्पद्यते पश्चात्तद्गुणानां कारणं ॥ तद्धि कारणभेदः [illegible]

द्वितीयक्षणे तिनकारणं ॥ [illegible] पूर्वापर्याभावात् ॥ न हि [illegible] तमेव [illegible] वलावीपथ्याद्भावी [illegible] ॥ प्रति [illegible]

द्भवति गुणानां कारणं न त्वेवं सति प्रथमक्षणे घटो निर्गुणः स्यात् ॥ अरूपित्वप्रसंगात् ॥ वायुवच्च ॥ तदेव हि द्रव्यं यत् गुणप्रयत्न

वेगस्पृष्टत्वरूपवत् ॥ अद्रव्यं यस्मात्तु गुणाश्रय इत्येतावता प्रथमोत्पन्न द्रव्यं मिति द्रव्यलक्षणं मत्वा इति तु प्रथमक्षणे न प्रसंगः

× त्रिष   अरूपित्वस्पर्शवत्त्वाद्वायुवद्रूपमिति ॥ २

येन कारणेन ग्रहणात्तद्विनाग्रहणं तदेव ॥ १   तन्तं तद्द्रव्यं गुणमगुणं तिष्ठति तिष्ठायाः प्रथमं निर्गुणमेवोत्पद्यते नवा यद्गुण बीजावापनं द्व्यते द्वितीयादिक्षणे द्रव्यग्रहणयोग्यता यतो ग्रहणं ॥ इति सिद्धं ॥ १

सोऽयं दि घटश्चक्षुषा न गृह्येत तदा का हानिः ॥ तेन घटप्रभृतिम[illegible] निर्गुण एव घटः प्रथमक्षणे उत्पद्यते ॥ द्वितीयादिक्षणे तु तद्गुणा

तूत्पद्यंते ॥ न प्रथमक्षणे ॥ अद्रव्यत्वापत्तिः ॥ समवायिकारणं द्रव्यमिति द्रव्यलक्षणं मया गमाद्येगम्यता तद्गुणाश्रितत्वात् समवायिकार   बार

णं द्रव्यं तु तत् ॥ असमवायिकारणं प्रत्यासन्नमवधृतसामर्थ्यं कारणं ॥ यथा तंतुसंयोगः पटस्यासमवायिकारणं तंतुसंयोगस्य गुण

स्य पटसमवायिकारणेषु गुणिषु तंतुषु समवायात् तत्र समवायिकारणप्रत्यासन्नत्वात् ॥ अन्यथासिद्धनियतपूर्ववर्तित्वात् ॥   कारणत्वं कार्यप्रत्यास त्तेः

न पटं प्रतिकारणत्वाद् ॥ एवं तंतुगतरूपं पटगतरूपस्यासमवायिकारणं ॥ तंतुपटरूपस्य पटः समवायिकारणं ॥   ५

न तद्धि तस्य स्वकस्यावि[illegible] धर्मस्य पटरूपं प्रत्यसम वायिकारणत्वं तु वितानस्यैव समवायिकारणप्रत्यासन्नत्वा

त् नतं तत्ररूपस्यास्तस्य समवायिकारणप्रत्यासन्नत्वा त् तिवं पटे समवायिकारणप्रत्यासन्नस्यापि परंपरया समवा

यिकारणप्रत्यासन्नत्वात् ॥ निमित्तकारणं तदुच्यते यथा   यिसमवायिकारणं नाप्यसमवायिकारणं ॥ अथ वा कारणं

यथा वेमादिकं पटस्य तदेतत्त्रिविधानामन्यतमं त्रिविधं कारणं ॥ अनाव[illegible] निमित्तकारणं ॥ तस्य च त्रिविधस्य समवायाद्यसम

वायस्य चाव्यय धर्मवाच्यं तदेतत्त्रिविधकारणमध्ये यदेव कथमपि सातिशयं तदेव करणं ॥ तेनैव कथं व[illegible]तम

लक्षणं ॥ प्रमाकरणं प्रमाणमिति सिद्धं यथा प्रत्यक्षमावरणप्रमाणस्य लक्षणास्य ॥ कामतां तराणुमारणप्रमाणलक्षणमतु[illegible]

दति प्रत्यक्षं ॥ द्विविधमक्षसन्निकर्षतो धीगतार्थांश्रितं प्रमाणमिति लक्षणं तत्र घटोयं घटोयमित्यक्षमित्येवं घटे भ्रमावादि

तनिमित्तं तिमित्तकारणमित्यर्थः समवायिकारणं बहुत्वादावतिव्याप्तिः स्यात् तदर्थं तु कं यन्न समवायिकारणं नाप्यसमवायिकारणं तद्द्वयोः कारणं पदं विहायतावन्मात्रे नैव भवति ॥ अव्याप्ति[illegible] अथवा तत्र कारणपदं कार्याय तु [illegible] त्रिविधमित्यर्थः ॥ ५

अवितं येन प्रमोत्पादकमित्यर्थः ॥ २

× तद्धा ७   × तत्समवायिकारणं ६

तर्कभा ३

क्रियाविनाशाद्वा संयोगनाशात्तन्तुसंयोगनाशाद्वा ॥ २

तज्जन्यपुरुषव्यापारजनको व्यापारः। इन्द्रियजन्य इन्द्रियार्थसंनिकर्षः। इन्द्रियजन्यज्ञानजनकः फलकरणयोर्मध्यवर्ती नामव्यापारः ॥ ११

×लच १

कविज्ञानानां हेतौ व्याप्तिर्नाम प्रमाणप्रमेयाज्ञानवांश्चाय लक्षणविशिष्टविषयीकारणादनधिगतार्थाधिगन्तृता प्रत्यक्षेणानवस्थ
सकालसंदानाकालनाशादिदं यद्देहे क्रियादिसंयोगानां नानावर्णा योगपद्यालिमानानस्यानन्तप्रमायाः करणानि बहूनि मवि
प्रमातृप्रमेयादीनि तान्यपि किं करणानि तत्ताननि त्याज्यानि सत्यपि प्रमातरि प्रमेये च प्रमा नोत्पद्यते। इन्द्रियसंयोगादौ सत्यवि
लंबेन प्रमोत्पत्तेरिन्द्रियसंयोगादिरेव कारणं प्रमायां साधकत्वाविशेषेऽपि तेनैवातिशयेन प्रमात्रादिभ्योऽतिशयितत्वा
त्। अतिशयितत्वं साधकं साधकतमं तदेव करणं प्रमाणं — निकारकं भवेच्च तदिन्द्रियसंयोगादि प्रमाकारणत्वा
न्मानं प्रमाणं प्रमाणान्तरादीनामिव प्रमाणानि वा रीत्या — च सस्य यत् प्रत्यक्षप्रमाणानुमानोपमानशब्दाः प्रमाणानि। किं
पुनः प्रत्यक्षं साक्षात्कारि प्रमायाः करणं प्रत्यक्षं साक्षा — कारिणी च प्रमा सेवोच्यते या इन्द्रियजा सा च द्विविधा सवि
कल्पनिर्विकल्पभेदात्। तस्याः कारणं त्रिविधं कदा — चिदिन्द्रियं कदाचिदिन्द्रियार्थसंनिकर्षः कदाचिज्ज्ञानं
दा निर्विकल्पकं ज्ञानं फलम्। तथाहि आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन
इन्द्रियाणां वस्तुप्राप्यकारित्वनियमात्। अतोऽर्थसंनिकृष्टेनेन्द्रियेण निर्विकल्पकं नामजात्यादियोजनाहीनं वस्तुमात्र
वगाहि किंचिदिदमिति ज्ञानं जन्यते तस्य ज्ञानस्येन्द्रियं करणं छिदायामिव परशुः। इन्द्रियार्थसंनिकर्षोऽवान्तरव्यापारः छि
दाकरणस्य परशोरिव दारुसंयोगः। निर्विकल्पकं ज्ञानं फलं परशोरिव छिदा। कदा पुनरिन्द्रियार्थसंनिकर्षः करणं यदा ३

४ नन्ववस्तु नमीलनानन्तरमेवानेकयोजनस्थितमार्तण्डमण्डलमुपलभ्यते तथा राजमन्दिरे मेर्यावाद्यमानायां मन्दिरमध्यस्थ
= एवं वर्तुर्मासं संयोगे सति इन्द्रियाणामर्थप्रतीतिरिदं इति। ... इन्द्रियाणामितिमतानी इन्द्रियाणि प्राप्य वस्तुप्रकाशकानि ... इन्द्रियवात्वावि निरिन्द्रियवत् दूरे ... निश्चय
मीनस्य पुंसः शब्दप्रतिपत्तिर्जायते तत्कथमिन्द्रियार्थयोः संबन्ध इत्युच्यते इत्याशंक्याह इन्द्रियाणामिति मतानी इन्द्रियाणि प्राप्य वस्तुप्रकाशकानि ... नयनोन्मीलनानन्तरं नायतः ... सूर्यमण्डलं प्राप्य वपुः काशं प्रतितिष्ठति ... नकार्य
वातिशयः ... मयूखमालि ... तोदर्शनालोकः प्रसरीप्रशतितद्वनयनोन्मीलनानन्तरं नायतः ... अर्थसंबन्धेनेन्द्रियेण निर्विकल्पकं ज्ञानमिति योजना ४
सिवशब्दस्योपलब्धिः। ... तायैवं तत्राहा ... इति तत इन्द्रियार्थयोः संनिकर्षः साधितः ... निर्विकल्पकं ज्ञानमिति योजना

दा४ ×द्वि २

यद्वा घटयोः परस्परपरिहारेण पृथगाश्रयाश्रितत्वात् ॥ ७

× वाक्य १

तदा निर्विकल्पकज्ञानमवान्तरं सविकल्पकं नामजात्यादियोजनात्मकं डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति विशेषणविशेष्यभावाव
गाहि ज्ञानमुत्पद्यते तदा इन्द्रियार्थसंनिकर्षः करणं निर्विकल्पकज्ञानमवान्तरव्यापारः सविकल्पकं ज्ञानं फलं कदा पुनर्ज्ञानं करणं
यदा यथोक्तसविकल्पकानन्तरं हानोपादानोपेक्षाबुद्धयो जायन्ते तदा। निर्विकल्पकज्ञानं करणं सविकल्पकज्ञानमवा
न्तरव्यापारः हानादिबुद्धयः फलं कश्चिदेव मा हा सविकल्पकादीनां मुख्यमिन्द्रियमेव करणं यावत्त्रिविधाः प्रत्यक्षा
संनिकर्षादीनितानि सर्वाण्यवान्तरव्यापाराः। इन्द्रि — यार्थयोस्तु यः संनिकर्षः साक्षात्प्रमाहेतुः स षड्विध एव तद्यथा
संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवा — यः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति। तत्र
दा चक्षुषा घटविषयं ज्ञानं जन्यते तदा चक्षुरिन्द्रि — यं घटोऽर्थः अनयोः संनिकर्षः संयोग एव अयुतसिद्ध्यभावात्
एवं मनसान्तरिन्द्रियेणात्मविषयं ज्ञानं जन्यते तदा — हमिति तदा मन इन्द्रियमात्मार्थः अनयोः संनिकर्षः संयोग एव ॥
अयुतसिद्ध्यभावात्। कदा पुनः संयुक्तसमवायः संनिकर्षः यदा चक्षुषा घटगतरूपादिकं गृह्यते अस्ति घटे श्याममिति तदा
चक्षुरिन्द्रियं घटगतरूपाद्यर्थः अनयोः संनिकर्षः संयुक्तसमवाय एव चक्षुःसंयुक्ते घटे रूपादेः समवायात्। एवं मनसात्मसम
वेते सुखादौ ग्राह्ये ... एवं संनिकर्षः घटगतपरिमाणादिग्रहेऽप्यस्य संनिकर्षोऽप्यधिकं कारणमिष्यते। ... प्रिम
युक्तसमवायेतद्वन्नावहाइपरिमाणादिग्रहणा चक्षुषः संनिकर्षो यथा। इन्द्रियावयवैरर्थावयवानाम् इन्द्रियावयवि नः

×द्वार
×इंद्रियाः ×संयुक्त ×वृ६

...श्रय विनाशे इंद्रियावयवैरर्थावयविनो अप्युभयविनाशे इंद्रियावयवानां संयोग इति । कदाचित्समवेतसमवायःसंनिकर्षः
यदा पुनश्चक्षुषा घटरूपादिसमवेतं रूपत्वादिसामान्यविषयं ज्ञानं जन्यते । तदा चक्षुरिंद्रियं रूपत्वादिसामान्यमर्थः । अनयोः
संनिकर्षः संयुक्तसमवेतसमवाय एव चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वादिसमवायात् । कदाचित्पुनः समवायलक्ष
णः संनिकर्षः यदा श्रोत्रेण शब्दो गृह्यते । तदा श्रोत्रमिंद्रियं शब्दोर्थः अनयोः संनिकर्षः समवाय एव श्रोत्रस्याकाशात्मकत्वा
च्छब्दस्याकाशगुणत्वाद् गुणगुणिनोश्च समवाया त् शब्दो गुणः सामान्यवत्वे सत्यस्मदादिबाह्यैकेंद्रियग्राह्यत्वा
द्रूपादिवत् । यदा पुनः शब्दसमवेतं शब्दत्वादिसा मान्यं गृह्यते । श्रोत्रेण तदा श्रोत्रमिंद्रियं शब्दत्वं सामान्यमर्थः । अ
नयोः संनिकर्षः समवेतसमवाय एव । श्रोत्रसम वेते शब्दे शब्दत्वस्य समवायात् । कदाचिद्विशेषणविशेष्यभाव
इंद्रियार्थसंनिकर्षः यदा चक्षुःसंयुक्ते भूतले घटाद्यभावो गृह्यते । इह भूतले घटो नास्तीति तदा चक्षुःसंयु
क्तस्य भूतलस्य घटाद्यभावो विशेषणं यदा मनःसंयुक्ते आत्मनि सुखाद्यभावो गृह्यते । अहं सुखरहित इति तदा मनःसंयु
क्तस्यात्मनः सुखाद्यभावो विशेषणं यदा श्रोत्रसमवेते गकारे घत्वाभावो गृह्यते । तदा श्रोत्रसमवेतस्य गकारस्य घत्वाभा
वो विशेषणं । तदेवं संबंधिविशेष्यतया इंद्रियार्थसंनिकर्षेण अभाव इंद्रियेण गृह्यते । एवं समवायोपि चक्षुःसंबद्धेषु तंतु
षु विशेषणीभूतः पटसमवायो गृह्यते । इह तंतुषु पटसमवाय इति । तदेवं संक्षेपतः षोढा संनिकर्षो वर्णितः ।

विशेषण२ ×ग्राह्य६

×लिंगपरामर्शेनास्त्यनुमीयते ५
×३४
तस्य तिरस्कृतस्वार्थक्रियासामर्थ्यस्यालौकिकस्य जनकत्वाभावात् ॥ =१

यदस्याः अव्यक्ता प्रमितिर्द्वैधा सविकल्पा निर्विकल्पका करणं त्रिविधं तस्याः संनिकर्षस्तु षड्विधः ॥ तत्र निर्विकल्पकं प्रत्यक्ष
स्वलक्षणविषयं तथा तत्र प्रत्यक्षं सविकल्पकं तु शब्दलिंगवदनुगताकाराः स्वग्राहित्वात् सामान्यविषयकं प्रत्यक्ष
र्थ इत्येव प्रत्यक्षत्वात् अर्थस्य च परमार्थतः सत एव जनकत्वात् स्वलक्षणं तु परमार्थसन्न तु सामान्यं । तस्य प्रमाणान्तरविषयत्वेन
वस्तुग्राहकत्वात् । अत्र ब्रूमः । नैवं सामान्यस्य वस्तुभूतत्वात् । तच्च निवेदयिष्यते । तदेवं व्याख्यातं प्रत्यक्षं । लिंगपरामर्शोऽनुमा
नं येन ह्यनुमीयते तदनुमानं । अतो लिंगपरामर्शो ऽनुमानं । तच्च धूमादिज्ञानं अनुमितिं प्रति करणत्वात् । अग्न्या
दिज्ञानमनुमितिः तस्याः करणं धूमादिज्ञानं । किं पुनर्लिंगं कश्चास्य परामर्शः । उच्यते । व्याप्तिबलेनार्थ य१
गमकं तत्र लिंगं । यथा धूमोग्नेर्लिंगं तथा हि य त्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः । तस्यां गृहीताया
मेव धूमोग्निं गमयति अतो व्याप्तिबलेनाग्नेर्गमकत्वात् धूमोग्नेर्लिंगं तस्य तृतीयं ज्ञानं लिंगपरामर्शः
तथा हि प्रथमं तावन्महानसादौ भूयो भूयो धूमं पश्यन् वह्निं पश्यति तेन भूयोदर्शनेन धूमाग्न्योः स्वाभाविकं संबंधमवधा
रयति यत्र यत्र धूमस्तत्राग्निरिति । यद्यपि यथैव धूमाग्न्योस्तथैव तत्र तत्र श्यामत्वमपि भूयोदर्शनेन समानं तथापि मैत्रतनयत्व
श्यामत्वयोर्न स्वाभाविकः संबंधः किंत्वौपाधिक एव शाकाद्यन्नपरिणामस्य तत्रोपाधेर्विद्यमानत्वात् । तथा हि श्यामत्वे मैत्रतनय
त्वमप्रयोजकं किंतु शाकाद्यन्नपरिणतिभेद एव प्रयोजकश्चोपाधिकः । न च धूमस्याग्नेः संबंधे कश्चिदुपाधिरस्ति । अयोग्य

व्याप्तिरेव दृश्यमाना ... प्रयोजकः ... निरूप्यते । समानमपि भावावेदकं ... दनेन यदि नोपाधिः
प्रयोजकः ... उपाधिः प्रयोजक एव

[illegible]

करण... व्याप्तिविज्ञान... प्रदेशात्

लनमर्थगमप तालिंगं

स्यां किंच शंका व्याघातावधिः। योग्यपदस्य व्याघातपदस्य मानवापाप। यत्रोपाधिरस्ति तत्रोपलभ्यते तद्यथा आर्द्रेन्धनसंबंधेन आर्द्रेन्धनसंयोगः॥ लिंगा
वस्य साधर्म्येन सहसंबंधि निष्ठवश्य उपाधिः॥ यत्र तत्र यस्य यस्य वश्याम वश्य संबंध शाकाद्युपाधिः निमित्तत्वात्व्यवहाश्च सम्यगृमा
हवर्थकश्चिदुपाधिरस्ति यूथत्व विप्यवदाभ्रहस्यात् ततो दर्शनात् सावात्राग्निमित्त केसहकारिणा अनुपलंभसनाथेन प्रत्य
क्षेणोपाधेः व्यभिचारवत्त्वात्। तथा च उपाधेरभावग्रहणात् जनित संस्कारसहकृतेन धर्मिग्राहकप्रमाणेन सहकृतेन स
र्थयाहिणा प्रत्यक्षेण धूमाग्न्योर्व्याप्तिरवधार्य तत्र न धूमाग्न्योर्व्याप्तिक एव संबंधः॥ न चौपाधिकः स्वाभा
विकश्च संबंधो व्याप्तिरुच्यते। तदनेन न्यायेन धूमाग्न्योर्व्याप्तिग्रहस्थानायां महानसे प्रथमं धूमज्ञानं तत्र व्याप्तिसं
नं। पर्वतादौ पक्षे धूमज्ञानं द्वितीयं। तत्र व्याप्तिं गृहीतां धूमाग्न्योर्व्याप्तिं स्मृत्वा तत्र पर्वते पुनर्धूमं पश्य
शति॥ अयं च पर्वतोग्निमान् धूमादिति न दृ दं धूमज्ञानं तृतीयं। यत्त्वावव्याप्यमत्रकपद्यं यथा यत्र धूमस्त
त्राग्निरिति तृतीयं तु कथमग्निनाऽविनाभावी इत्याशंकायां निवारयति तस्माद्वह्निव्याप्यधूमवानयमिति ज्ञानमेव विशिष्टव्याप्यत्वावगाहि लिंगपराम
र्शः॥ अनुमितिकरणं व्याप्त्यनुमानं नव्यानां मते पर्वते वह्निरिति अनुमितिज्ञानमुत्पद्यते। ननु कथं यत्र यत्र धूमस्तत्राग्नि
न सो धूमज्ञानेन तत्रानुमापकत्वं॥ व्याप्तेरगृहीतत्वात् गृहीतायामेव व्याप्तावनुमितिर्दृष्टा॥ अथ व्याप्तिनिश्चयात्प्राक्
तेषां महानसे एव वह्निरनुमीयतां। नैवं। अग्नेर्दृष्टत्वेन संदेहस्याभावात्॥ संदिग्धस्यार्थस्यानुमीयमानत्वात्॥ यथोक्तं भाष्यकृता। नानुप

×तस्मात्त

नु३ ५

×तथ

लब्धे न निर्णीतेर्थे न्यायः प्रवर्तते। अपि तर्हि संदिग्धे॥ अथ दृष्टे पर्वते मात्रस्य सोयं धूमज्ञानेन कथं नाग्निमनुमापय
ति। अग्निव्याप्तिसंबंधेन साधकबाधकप्रमाणाभावे संशयस्य न्यायप्राप्तत्वात्॥ स्वयं गृहीतव्याप्तेर्विवदन्तं निश्चित
याधेरपि संभोगमानानुदयेन व्याप्तिस्मृतेरप्यनुमितिहेतुत्वात्। धूमदर्शनाद्व्याप्तिस्मारिति। यो यो धूमवान् सोऽसावग्नि
मान् यथा महानसमित्यादि। तेन धूमदर्शनेनोद्बुद्धा तथा विस्मृता तत्र व्याप्तियां पुनर्धूमज्ञानं तृतीयं धूमवांश्चायमिति। तादृशाग्निमनुमा
पयतीति तात्पर्यम्। तदेव लिंगपरामर्शः। तेन व्याप्तिविशिष्टत मेव लिंगपरामर्शोनुमानमिति। तच्चानुमानं द्विविधं स्वा
र्थं परार्थं चेति। स्वार्थं स्वप्रतिपत्तिहेतुः। यथा स्वय मेव महानसादौ विशिष्टेन प्रत्यक्षेण धूमाग्न्योर्व्याप्तिं गृ
हीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्व तवर्त्तिनीमविच्छिन्नमूलामभ्रंलिहां धूमलेखां पश्यन् धूम
दर्शनादुद्बुद्धसंस्कारो व्याप्तिं स्मरति यत्र धूमस्त त्राग्निरिति। ततस्तत्रापि धूमोस्तीति प्रत्यक्षं। तस्मात्प
र्वतेऽग्निमानिति स्वयमेवानुमितिः प्रवर्तते। तत्स्वार्थानुमानं। यत्र स्वयं धूमेनाग्निमनुमाय परं बोधयितुं पंचावयवमनु
मानवाक्यं प्रयुङ्क्ते तत्परार्थानुमानं। तद्यथा। पर्वतोयं वह्निमान्। धूमवत्वात्। यो यो धूमवान् सोऽग्निमान् यथा महानसं। तथा चा
यं धूमवान्। तस्माद्धूमवत्वाद्वह्निमानिति। अनेन पंचावयवेन वाक्येन प्रतिपादितात् पंचरूपोपपन्नात् लिंगात्प
रोप्यग्निं प्रतिपद्यते। तेनैतत्परार्थानुमानं। अत्र पर्वते साध्याग्निमत्त्वेन साध्यं धूमवत्त्व हेतुः॥ स्ववाच्यव्यतिरेकीय वचनेनापि

कीता स्वकेणान्वयव्याप्तेः ॥ तथाहि यत्र धूमस्तत्राग्निर्यथा महानसमिति अन्वयव्याप्तिः ॥ महानसे धूमाग्न्योरन्वयस्य दर्शनात् ॥ एवं यत्रा
३ ग्निर्नास्ति तत्र धूमोपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः ॥ महाह्रदे धूमाग्न्योर्व्यतिरेकस्य दर्शनाद्व्यतिरेका
व्याप्तेरयं क्रमः ॥ अन्वयव्याप्तौ यद्व्याप्यं तदत्र व्यापकं यद्व्यापकं तदत्र व्याप्यमिति तदुक्तं व्याप्यव्यापकता
या विलोमवर्यायादर्शनात् तयोरभावयोः स्यादाहि परीतत्वमीयतां ॥ तदेवं धूमवत्त्वहेतोरन्वयव्यतिरेकेणव्याप्ति
रस्ति ॥ यत्तु धूम्यादौ केवलान्वयव्याप्तिरन्वयदर्शनात् तदेकेनापि चरितार्थत्वात् तत्रान्वयस्याधिक्यं तत्र प्रदर्श
नं कृत्वा मायेणासिद्धतोऽर्थं स्वं वाक्यं साधनताया मात्रा ॥ तव्यतिरेकव्याप्तेरभावात् ॥ तदेवं धूमवत्त्वहेतुरन्व
यव्यतिरेकी ॥ एवमन्योपि अनिदत्यवादीसाधकत कत्वादयोऽहेतवो व्यतिरेकिणा दृष्टव्याः ॥ केचिद्धेतु
ः केवलव्यतिरेकी ॥ तद्यथा सात्मकं प्राणा दिमत्वं हेतुः ॥ यथा जीवच्छरीरं सात्मकं प्राणादिमत्वात् यत्
सात्मकं न भवति तन्न प्राणादिमत् भवति यथा घटः ॥ न चैवं तथेदं प्राणादिमन्न भवतीति ॥ अत्र हि जीवच्छरीरस्य सात्म
कत्वं साध्यं प्राणादिमत्त्वं हेतुः स च केवलव्यतिरेकी अन्वययोग्यस्याभावात् ॥ तथाहि यत्प्राणादिमत्तत्सात्मकं यथा
मुक इति दृष्टान्तो नास्ति ॥ जीवच्छरीरं सर्वं पक्ष एव लक्षणमपि व्यतिरेकी हेतुः स्वपक्षे चरन् यथा पृथिवीलक्षणं गन्धा
वत्त्वं विवादपदं पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् यन्न पृथिवी न तद्गन्धवत् यथापः प्रमाणलक्षणं वा यथा प्रमाकरणत्वं तथाहि ६

×नंश
४॥ प्राणादिमचात्तेयेतिसात्मकामेव ४

×द्वो२ ×४व२

प्रत्यक्षादि प्रमाणमिति व्यवहर्तव्यं प्रमाकरणत्वात् यन्न प्रमाणमिति न व्यवह्रियते तन्न प्रमाकरणं यथा प्रत्यक्षाभा
सादिः ॥ यत्र प्रमाणं तत्र प्रमाणमिति व्यवहर्तव्यं यथामुक इति दृष्टान्ताभावात् ॥ प्रमाणमात्रस्य पक्षीकृतत्वात् ॥ अत्र व्य
वहारं साध्यः ॥ न तु प्रमाणत्वं तस्य प्रमाकरणत्वाद्धेतोरनन्वये साध्यसिद्धेः ॥ तदेवं केवलव्यतिरेकीणाद
र्शितो ॥ कश्चिद्धेतुः केवलान्वयी ॥ यथा विशेषोऽभिधेयः प्रमेयत्वात् ॥ यत्प्रमेयं तदभिधेयं यथा घटः ॥ तथा चायं
तस्मात्तथेति ॥ अत्र विशेषस्याभिधेयत्वं साध्यं प्रमेय त्वं हेतुः स च केवलान्वयी यदभिधेयं तन्न भवति तत्प्रमे
यमपि न भवतीति ॥ यथामुक इति व्यतिरेकदृष्टा न्ताभावात् ॥ सर्वत्र हि प्रामाणिक एवार्थो दृष्टान्तः सर्व
प्रमेयश्चाभिधेयश्चेति ॥ एतेषां चान्वयव्यतिरेकिके वलान्वयिकेवलव्यतिरेकिहेतूनां त्रयाणां मध्ये योऽ
न्वयव्यतिरेकी हेतुः स पञ्चरूपोपपन्न एव स्वसाध्यं सा धयितुं क्षमः ॥ न चैकेनापि रूपेण हीनः ॥ तानि रूपा
णि पञ्च पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति ॥ तानि रूपाणि धूमवादादन्व
यव्यतिरेकिणि हेतौ विद्यन्ते ॥ तथाहि धूमवत्त्वं पक्षस्य पर्वतस्य धर्मः ॥ पर्वते तस्य विद्यमानत्वात् ॥ एवं सपक्षे महानसे
हेतुर्महानसे विद्यते इत्यर्थः ॥ विपक्षाद्व्यावृत्तिः ॥ विपक्षात् महाह्रदाद्व्यावृत्तिः स्वत्वतो नास्तीत्यर्थः ॥ एवमबाधितविषयं
धूमवत्त्वं तथाहि धूमवत्त्वस्य हेतोर्विषयः साध्यधर्मो वह्निमत्त्वं तत् केनापि प्रमाणेन न बाधितं नावधीतमित्यर्थः ॥ एवं

×साध्य५ प्रतं५

तर्क
१८

स्य सत्प्रतिपक्षो यथैतत्र सत्प्रतिपक्षो। धूमवत्त्वं तथा हि साध्यविपरीतसाधकं हेत्वंतरं विपक्ष इत्युच्यते। अस्य च धूमवत्त्वे हेतौ न
स्त्येवानुपलंभात्॥ एवमेतैः पंचभी रूपैरुपपन्नं धूमवत्त्वं हेतुर्वह्नेः तेन तेन धूमवत्त्वमग्निमत्त्वस्यानुमापकं अग्निमत्त्वस्य साधकं त्रि
ग्नेः पक्षधर्मत्वं हेतोः। पक्षधर्मताबलात् सिध्यतीति तथा हि अनुमानस्याङ्गं व्याप्तिः पक्षधर्मता च तत्र व्याप्त्या सामान्यसि
द्धिः। पक्षधर्मताबलात् साध्यस्य पक्षसंबंधित्वं विशेषः सिध्यतीति पर्वतधर्मो धूमवत्त्वेन वह्निः पर्वतसंबद्धत्वेनानुमीयते।
अन्वये सामान्यस्य व्याप्तिग्राहकादेव सिद्धेः कृतमनुमानेन। अयमन्वयव्यतिरेकी हेतुः सम्यक्पंचरू
पोपपन्न एव सद्धेतुः। अन्यथा हेत्वाभासः॥ अयं हेतुरि तियावव्यतिरेकी केवलान्वयी वह्नौ पंचरूपोपपन्न एव धूमः
ध्वं साधयतीत्यस्य विपक्षाद्व्यावृत्तिर्नास्ति विपक्षाभा वात्। केवलव्यतिरेकी त्वरूपः। तस्य सपक्षे सत्त्वं ना
स्ति सपक्षाभावात्। किं तु पक्षसपक्षविपक्षान्वा- तीसं हि यः साध्यधर्माधर्मी स पक्षः। यथा धूमानुमानेन पर्वत
सपक्षस्तु निश्चितसाध्यधर्माधर्मी यथा तत्रैव धूमानुमाने महानसं। विपक्षस्तु निश्चितसाध्याभाववान्धर्मी यथा तत्रैव धू
मानुमाने महाह्रद इति तदेवमन्वयव्यतिरेकी केवलान्वयि केवलव्यतिरेकी त्रयो हेतवः प्रदर्शिताः। अथ हेत्वाभासा
ःस्तेऽप्यनेकप्रकाराः। असिद्धविरुद्धानैकान्तिककालात्ययापदिष्टप्रकरणसमभेदात्पंचैव तत्रासिद्धस्त्रिविधः। आ
श्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवत्। अत्र १

नत्र१

×प्रत्यंतेस्मात्र।४

त्र हि गगनारविंदमाश्रयः स च नास्त्येव। स्वरूपासिद्धो यथा अनित्यः शब्दश्चाक्षुषत्वात् घटवत्। अत्र चाक्षुषत्वं हे
तुः स च शब्दे नास्ति शब्दस्य श्रावणत्वात्॥ व्याप्यत्वासिद्धस्तु द्विधा। एको व्याप्तिग्राहकप्रमाणाभावात्। अ
परः सोपाधिकत्वात्। तत्र प्रथमो यथा। यत्सत्तत्क्षणिकं यथा घनः संश्च शब्दादिः [illegible] सोपाधिकतयात्र सत्त्वस्याप्य
व्यासिद्धत्वमनायासात्क्षणिकत्वमस्य [illegible]। द्वितीयो यथा क्रत्वंतर्वर्तिनी हिंसा अधर्मसाधनं
मानात् [illegible] हिंसावत्। अत्र हिंसाधर्मत्वे हिंसात्वं न प्रयोजकं किंतु निषिद्धत्वमेव प्रयोजकं उपाधिरि
तियावत्। तथा हि साध्यव्यापकत्वे सति साधनाव्या पकत्वं उपाधिरिति उपाधिलक्षणं तथा हि साध्यव्यापकत्वं
निषिद्धत्वस्य निषिद्धत्वं हि साध्यस्याधर्मत्वस्य व्याप कं यत्र यत्राधर्मत्वं तत्र तत्रावश्यं निषिद्धत्वमपि। अ
वं साधनं हिंसात्वं न व्याप्नोति निषिद्धता न हि यत्र यत्र हिंसात्वं तत्र तत्र निषिद्धत्वं यागीयपशुहिंसायां सत्यपि हिं
सात्वे निषिद्धत्वाभावात्॥ अयं च उक्त्या सोपाधिकत्वादि हिंसात्वं व्याप्यत्वासिद्ध एव। साध्यविपर्ययव्याप्तस्तु विरुद्धः
यथा शब्दो नित्यः कृतकत्वात् घटवत्। कृतकत्वं साध्यनित्यत्वविपरीतानित्यत्वेन व्याप्तं यो यो यत्कृतकं तदनित्यमे
व नित्यमिति [illegible] कृतकत्वं सव्यभिचारोऽनैकान्तिकः। स द्विविधः साधारणानैकान्तिकोऽसाधारणानैकान्ति
कश्च। तत्र पक्षसपक्षविपक्षवृत्तिः साधारणः [illegible] तदनित्यमनित्यमिति विरुद्धं [illegible] सव्यभिचारोऽनैकान्तिकः। स द्विवि

सत्वेन साध्यहेतो
॥=२

×त्रय५

तर्कसं ८

ष्टासाधारणानैकांतिकः असाधारणानैकान्तिकश्चेति तत्र पक्षसपक्षविपक्षवृत्तिः साधारणः यथा शब्दो नित्यः प्रमेयत्वा
दित्यत्र प्रमेयत्वं हेतुः तच्च नित्यानित्यवृत्तित्वात्साधारणः सपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणानैकांतिकः यथा भू
र्नित्या गंधवत्त्वात् गंधवत्त्वं हि सपक्षान्नित्याद्विपक्षादनित्याच्च व्यावृत्तं पक्षमात्रवृत्ति प्रकरणसमस्तु स यस्य हेतोः
साध्यविपरीतसाधकं हेत्वंतरं विद्यते यथा अनित्यः शब्दो नित्यधर्मरहितत्वात् अनित्यः शब्दः अनित्यधर्मरहितत्वादित्यत्र
यमेव सत्प्रतिपक्ष इति चोच्यते पक्षे प्रमाणांतरावधृ तसाध्याभावो बाधितविषयः कालात्ययापदिष्ट
इति चोच्यते यथा अग्निरनुष्णः कृतकत्वाज्जलवत् अत्र हि कृतकत्वस्य हेतोः साध्यमनुष्णत्वं तदभावः प्रत्यक्षे
णैवावधारितः स्पर्शनप्रत्यक्षेणोष्णत्वोपलंभात् व्याप्तिस्मरणसमानो अतिदेशवाक्यार्थस्मरणसहकृतं
गोसादृश्यविशिष्टपिंडज्ञानमुपमानं यथा गवयम जानन्नपि यथा गौस्तथा गवय इति कश्चिदारण्यकपु
रुषात् श्रुत्वा वनं गतो वाक्यार्थं स्मरन्यदा गोसादृश्यविशिष्टपिंडं पश्यति तदा तद्वाक्यार्थस्मरणसहकृतं गोसादृश्य
विशिष्टपिंडज्ञानमुपमानं उपमितिकरणत्वात् गोसादृश्यविशिष्टपिंडदर्शनानंतरं असौ गवयशब्दवाच्यः पिंड
इति संज्ञासंज्ञिसंबंधप्रतिपत्तिः सैवोपमितिः उपमितिकरणत्वादुपमानं उपमानमाख्यातं शब्दं लक्षयति
आप्तवाक्यं शब्दः आप्तस्तु यथार्थवक्ता वाक्यं पदसमूहः वाक्यं तु आकांक्षायोग्यतासन्निधिमतां पदानां समूहः

८

शुद्धं लक्ष्म फलं ८२

अतएव गौरश्वः पुरुषो हस्तीति पदानि न वाक्यं परस्पराकांक्षाविरहात् अग्निना सिंचेदिति वारिणा दहेदिति पदा
नि न वाक्यं योग्यताविरहात् नह्यग्निसेकयोः परस्परान्वययोग्यतास्ति तया हि अग्निनेति तृतीयया सेकरूपका
र्यं प्रति करणत्वमग्नेः प्रतिपादितं न चाग्निः सेककरणीभवितुं योग्यः तेन न कार्यकारणभावलक्षणसंबंधो अग्निसे
कयोर्योग्यत्वात् अग्निना सिंचेदिति न वाक्यं एवमेव किंकरः प्रहरे प्रहरे असहोच्चारितानि गामानयेत्यादिपदानि
न वाक्यं सत्यामपि परस्पराकांक्षायां सत्यामपि परस्परान्वययोग्यतायां परस्परसंनिध्यभावात् अत्र प
दानि तान्येव वाक्यं यथा ज्योतिष्टोमेन स्वर्गकामो यजेत तेषु परस्पराकांक्षायोग्यतासन्निधिमत्त्वादिति
यथा वा तान्येव गामानयेत्यादि पदस्य विलंबितोच्च
रितानि तान्येव पदानि तत्राकांक्षाणि किंचार्थः फल दीनामाधेयानां तीराद्याधाराकांक्षितत्वान्न वा वि
वार्थमात्रोत्पत्तिर्यावदपेक्षा आकांक्षायाः स्वरूपमभिधेयं तत्र धर्मत्वात्मत्वं अर्थोपस्थापकपदयोर्मध्ये
विषयाकांक्षानुरूपेण साकांक्षास्वरूपं तद्वारेण तत्प्रतिपादकानि पदान्यपि साकांक्षाणीत्युपचर्यते यथा
पदार्थेष्वेव स्वार्थप्रतिपाद्यार्थान्तरविषयाकांक्षा अनेकत्वे अपि साकांक्षास्वरूपं तद्वारेण पदान्यपि साकांक्षाणि पद
मर्थाः साकांक्षाः परस्परान्वययोग्याः तद्वारा पदान्यपि योग्यानीत्युच्यंते संनिहितं च पदानामेकेनैव पुंसा अवि

×सूत्र ८

संचितात्तावारितवंतश्च साक्षाद्विषयदेशसंनिवर्तिनार्थद्वारा तेन तायमर्थसंपन्नः॥ अर्थप्रतिपादकत्वं ...ऽः पदंत
रविषयामर्थानरविषयं॥ आकांक्षाजनयतां प्रतीयमानपरस्परान्वययोग्यपदार्थप्रतिपादकानां पदानां संनिहिता
नां समूहो वाक्यमिति॥ पदं च वर्णसमूहः समूहश्चात्र एकज्ञानविषयीभावः॥ एवं च तत्र वर्णानां क्रमवतां आशुत
रविनाशत्वेन एकदानेकवर्णानुभवासंभवात् पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतचरमवर्णानुभवाभावा
नवजनितसंस्कारसहकृतेन अंत्यवर्णसंबंधे न पूर्वपूर्वत्पादनसमयग्रहणे शब्दोत्पन्नश्रोत्रेण।
केऽपि वृषदसदनेकवर्णावगाहिनी पदप्रतिप त्तिर्जन्यते तत्सहकारिता दीर्घपदान्तरविज्ञानवत्राप
त्यभिज्ञाज्ञानं प्रत्यक्षे हि अतीतादिपूर्वांशस्य॥ रूपपत्वे तत्र पूर्वपूर्वपदानुभवजनितसंस्कार
सहकृतेन अंत्यपदविषयेण श्रोत्रेन्द्रियेण पदा र्थान्यास त्यक्त्वा गृहीतेन नानेकपदावगाहिनी वाक्य
प्रतीतिः क्रियते तदिदं वाक्यमाप्तरूपः प्रयुक्तं सत् शब्दनामकं प्रमाणं फलं च स्वपदार्थज्ञानं तदेव हि प्रमा
लक्षणं लोके वेदे च साधारणं लौकिकं च यं विशेषस्य कश्चिदाप्तो भवति न सर्वः॥ ततः किंचिदेव लौकिकं वाक्यं प्रमा
णं यदाप्तकर्तृकं न सर्वं वैदिकं तु परमाप्तमहेश्वरप्रणीतं सर्वं वाक्यं प्रमाणं सर्वस्यैवाप्तवाक्यत्वाविशेषात् सितानिव
चारि प्रमाणानीति स्थितम्॥ अनुप्रमाणानि प्रमाणस्य तोऽप्येवं तर्कवादाः अर्थापत्तिरपि प्रत्यक्षप्रमाणमस्ति ...

शब्दनामप्रमाणस्य ~४

४॥ अपीनः पीन स्थूल राज्ञो भुक्ते ~४

दिपीनो देवदत्तो दिवा न भुंक्ते॥ इत्यत्र देवदत्तस्य रात्रिभोजनमनुमीयते दिवाऽभुंजानस्य पीनत्वं रात्रिभोजनमन्तरेणानु
पपद्यमानं तत्र पीनत्वान्यथानुपपत्तिः प्रस्तुतार्थापत्तिर्वरात्रिभोजनं प्रमाणं अस्य ... रात्रिभोजनमस्य प्रत्यक्षाद्यविषयं
त्वात्... रात्रिभोजनस्यानुमानविषयत्वात् तथाहि॥ अयं देवदत्तो रात्रौ भुंक्ते दिवाऽभुंजानत्वे सति पीनत्वात्॥ यस्तु न रात्रौ भुं
क्ते नासौ दिवाऽभुंजानत्वे सति पीनः॥ यथा दीवारात्राव भुंजानो पीनः न चायं तथा तस्मान्न तथेति॥ केवलव्यतिरेकानुमानेन
रात्रिभोजनस्य प्रतीयमानत्वात्॥ किंमर्थमर्थापत्तिः पृथक् प्रमाणं कल्प्यते॥ तथा भावाख्यमपि प्रमाणांतर
मभावग्रहणाय मीमांसकैरंगीकृतं तथाहि घटाद्यनुपलब्धेः घटाद्यभावो निश्चीयते॥ अनुपलब्धिरेव प्रमाणं अभावस्य
ति॥ अभावप्रमाणेन घटाद्यभावो गृह्यते॥ तत्र॥ अय थोग्यघटोऽस्त्वविषयः॥ तदा भूतलमिति ज्ञानं ... इत्यादि
तर्कसहकारिणानुपलंभसनाथेन प्रत्यक्षेणैवाभावग्रहणात् ... इन्द्रियाणि संनिकर्षाख्यकानि तथाहि
इन्द्रियाणि वस्तु प्राप्य प्रकाशकानि ज्ञानकरणत्वात्॥ आलोकवत् आयस्काववत् ... प्राप्यकारीणि चक्षुरिन्द्रियं वा ... त्वा
दिवत्॥ चक्षुरादीनां प्राप्यकारित्वमुपपन्नमिन्द्रियार्थसंनिकर्षः॥ संबंधश्च संयोगः समवायो द्विसंबंधो भूतो ... यास्तु
विशेषणविशेष्यभावः संबंधपदमवति॥ भिन्नयोः ... संबंधो ... संयोगः समवायस्तु ... भिन्नयोस्सयोः संबंधस्य
प्रत्येकमपृथक् इदं द्वयोः संयोगः ... भिन्नः॥ तदाश्रितत्वेऽप्यनन्यदृविशेषणविशिष्यभावस्तथा॥ तथाहि

~= नेत्रीदुंसश्रितः॥ ~~

×त्रिशाच्चतमपि २ ×प्रकारादिकं प्रतिप

…ना डेपुरूपयोर्विशेषणविशेष्यभावो नात्माविशिष्यते न हि दंडस्य विशेषणत्वमर्थान्तरं अपि तु स्वरूपमेव । नीलादेस्तथा विशेषण

१० त्वमपि तत्स्वभावात् घटस्वरूपसंबंधविशेषो वा तदर्थान्तरं अनवस्था । वत्र भावस्य विशिष्टविशेषणत्वादनवस्थापादकस्यानित्यत्वादर्थस्य

उपाधेयत्वमप्यसंभवः । तस्मादभावस्य घटोपरक्तबुद्धिजनकत्वं घटस्वरूपं तदेव विशेषणता न त्वर्थान्तरं एवं व्यापकत्वकारण

त्वादयोऽप्यूह्याः । अथ प्रतियोगिबुद्धिजनकत्वं स्वरूपमेव हि अभावस्य । अभावादीनां धूमादिकं प्रति कारणत्वमपि कार्यत्वव

ताच्छेदकीयनिरूपकस्वरूपमेव हि तद्वादीनां तद्वत्त्वं । तं हि तत्स्वभावस्य व्यापकत्वाकारणत्वादीनां स्वरूपमात्रमा

त्रादिमत्त्वः । तदेवं विशिष्टविशेष्यतावाभावानवि । शेष्यविशेषणरूपत्वान्न भिन्नः । नास्मन्नयाश्रितः विशे

षणविशेषणीभावमात्रस्य सप्रतियोगी । विशेष्यता । वस्या नान्या । विशेष्यविशेष्यतामात्रस्य सप्रतियोगी विशे

षणत्वस्याभावात् । नान्यकः विशेषणीभावे । वानयोर्वृत्तिर्द्वयोः परं स्वरूपमात्रमभावशब्दः प्रत्येकं सं

बध्यते । तथा च विशेषणताविशेष्यताव अत्र व्यापकत्वाद्विवितोपकश्च संबंधः तस्मादेव विशेषणविशेष्यताभावः संबंधः

एवं व्याप्यव्यापकताभावादावपि संबंधः । संबंधशब्दप्रयोगस्तु स्वरूपाणामधिकरणप्रकारावगाहित्वात् संबंधस्य

नावच्छिन्ने येन यद्वर्णनं संभवति सत्त्वाभावाद्विन्नत्वात् । यः स्वप्रत्यक्षे प्रकाशयति ह्येवं प्राप्यमेव प्रकाशयति । न तु नावस्य

प्रतिस्वभावं प्रकाशयति हि एवं विशेषणतु स्वेन तेनैवेति सिद्धान्तः । असंबंधाभावग्रहे स्यादिति प्रसंगादेव विशेषणतयैवान- १०

संसर्गपरमतो इदमिदानीं निरूप्यते । अनन्तरं जाते तस्य प्रामाण्यमवधार्यं कश्चिज्ज्ञानादेः स्वतः विज्ञानकत्वं तु पीद

हादेव स्वतः । अत एव स्वतः कालांतरप्रतीतेः प्रामाण्यमेवधारयतीति स्वतःगतिः । अत्र केचिदादप्रामाण्यमप्रामा

ण्यमवधार्यं स्वरूपः प्रवर्तते । स्वतः स्वप्रामाण्यावधारणाद्वा । अस्यायमर्थः । येनैव ज्ञानं गृह्यते तेनैव तत्प्रामाण्यम

पि न तु ग्राहकज्ञानग्राहकादन्यज्ञानधर्मस्य प्रामाण्यस्य ग्राहकं । तेन ज्ञानग्राहकातिरिक्तानपेक्षितत्वमेव स्वतस्त्वं प्रा

माण्यस्य ज्ञाने च प्रवृत्तेः । तदेव वृहीतं कथमन्यथा । अप्रामाण्यप्रामाण्यसंदेहोऽपि स्यात् । अनधिगतेव मिणि

संदेहस्तु दध्याभातस्मात् प्रवृत्तेः पूर्वमेव ज्ञाततायां । तथा तु पपत्तिप्रसूतया अर्थापत्त्या ज्ञानगृहीतज्ञानगत

प्रामाण्यमर्थापत्त्यैव गृह्यते । ततः प्रवृत्तिः । घटप्रवृत्तेन । तु प्रथमं ज्ञानमात्रं गृह्यते । ततः प्रवृत्तकाले फल

संदर्शनेन तज्ज्ञानस्य प्रामाण्यमवधार्यते । अप्रयोजकं ते तन्न । अन्यथानुपपत्तिप्रसूतया अर्थापत्त्या ज्ञानं गृह्यत इति

नसहामदे यदुक्तं तदेव नष्टं यस्मिन् हेतु तयाप्रामाण्यग्रहणीया तु दूरत एव । तथा हि इदं किल परस्यासि मतं घटादिविषयेज्ञानेजा

ते मया ज्ञातोऽयं घट इति घटस्य ज्ञातत्वं प्रतिसंधीयते । ततस्तज्ज्ञानं ज्ञाते सति ज्ञानतानामकश्चिद्धर्मो जात इत्यनुमीयते तस्य

च ज्ञानस्य स्वं मज्ञानत्वात् । ज्ञाने ज्ञाते ज्ञातत्वाभावः स्वयमेव अत्यन्तं कालान्तरानुमेयं ज्ञानं तदवधार्यते । एवं ज्ञानजन्यो ज्ञातत

नामधर्मो ज्ञानमन्तरेणानुपपद्यते । कारणाभावे कार्याभावात् । तेनार्थापत्त्या प्रकारं ज्ञानं ज्ञानतया ज्ञायते इति न

तर्कभाषा येनघटः॥ज्ञानविषयातिरिक्ताया ज्ञाततायाअभावात्॥नच ज्ञानेनजनितज्ञाततांप्रत्यक्षमेवहिघटोदृष्ट इतिज्ञानविषयत्वं तथाहि
११ नताघस्मादात्मेनविषयता॥घटज्ञानयोःसादात्म्याननुपगमात्॥तद्व्यवहारविषयत्वेऽपिइंद्रियादिविषयत्वापत्तेः॥इंद्रिया
दपितस्यज्ञानस्योत्पत्तेः॥तेनेतदुक्तमपियातज्ञाततघटेकिंविज्ञानमिति॥येनघटःप्रत्यक्षज्ञानस्यविषयोमायज्ञता॥ज्ञाताविषयत्वाय
थाद्रुपपत्तेवज्ञाततासिद्धिः॥तत्रप्रत्यक्षमात्रेणातिवेष्टसाधादवविषयत्वोयुक्तः॥अर्थज्ञानयोरन्ताद्दशाप्रत्यक्षमानाधिकोविशेषः
॥येनानयोर्विषयविषयीभावः॥इतरथाऽतीतानागतयोर्वि षयत्वंनस्यात्तेनतज्ञाततानाजनतांसंवापज्ञाअमतिय
क्लिप्तिधर्मज्ञाननायोगात्॥किंयज्ञाततायाध्यविज्ञानविषः॥ यत्वाज्ञातत्वाविज्ञाततातौप्रसंगः॥तथाचानवस्था॥अथज्ञातता
स्वरूपेणाविषयसाधारादवविषयत्वंज्ञाततायाएवंवरञ्च टादावपिकिंज्ञाततयेति॥अस्तुवाज्ञातता तथापिनमाने
ज्ञानंप्रत्यहेतुतानज्ञाततावि शेषणेनप्रमाणज्ञानाया॥ त्रिवारिणाप्रामाण्यमितिकृतंपवज्ञानयोदकयाद्युताप्र
माण्यस्या॥अथकेनविरज्ञाततावि शेषयोःप्रामाण्यज्ञानाद्यसिवारिणाञ्ज्ञानप्रामाण्येसंदेहेवप्रवृत्तेः॥तथाएवंसंदेहप्रमाण्यपिवा
कंशाकाभिदं॥केनविरज्ञाततावि शेषयोःप्रामाण्यज्ञानाद्यसिवारिणाऽज्ञानप्रमाण्यसंदेहेवप्रवृत्ते॥इत्यप्रमाण्यमपिस्वतएव
गृह्यत॥अथैवमप्यप्रामाण्यंपरतःतथाप्रामाण्यमपिपरतएवगृह्यतां॥ज्ञानयाद्धकाद्द्यतमेशत्यर्थः॥ज्ञानंहिमानसप्रत्यक्षेणैव
गृह्यते॥प्रामाण्यंतुतरस्मात्येनेतत्तथाहिजलज्ञानानंतरंजलार्थिनःप्रवृत्तौदृष्टफलवताअफलस्तुविशेष्ययाफलवतो ११

अनुमानेल

प्रवृत्तिःसासमर्था॥तयाज्ञानस्ययाथार्थ्यमनुमीयते॥प्रयोगश्च॥विवादाध्यासितंजलज्ञानंप्रमाणं॥समर्थप्रवृत्तिजनकत्वात्॥यत्तु
प्रमाणंनतत्समर्थप्रवृत्तिजनकंयथाप्रमाणमितिव्यतिरेकी॥अत्रफलवत्प्रवृत्तिजनकंयज्जलज्ञानंतत्पक्षः॥तस्यप्रामाण्य
साध्यंयाथार्थ्यमित्यर्थः॥नतुप्रमाकरणत्वंव्याप्तिभावापत्तेः॥हेतुस्तुसमर्थप्रवृत्तिजनकत्वंफलवत्प्रवृत्तिजनकत्वमितिया
वत्॥अनेनतुकेवलव्यतिरेकानुमानेनाभ्यासदशापन्नस्यजलज्ञानस्यप्रामाण्येवाबाधितेतद्दृष्टांतेनप्रवृत्तेःपूर्वमपित
ज्जातीयत्वलिंगेनान्वयव्यतिरेकिणायस्यज्ञान– स्याभ्यासदशापन्नस्यापिप्रामाण्यमनुमीयातःइतिपरतएवप्रा
माण्यंनज्ञानग्राहकाणोवगृह्यतइतिविचार्यंव प्रमाणानिमुक्तिलेशोक्तिपूर्वकं॥केशवोबालबोधाययथाशा
स्त्रमवर्णयत्॥इतिप्रमाणान्युक्तानिप्रमेयाणि यंते॥आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफल यारकं
संदेहे ४ दुःखापवर्गाःप्रमेयमितिसूत्रंतत्रात्मत्वसामा न्यवानात्मा॥देहेंद्रियादिव्यतिरिक्तःप्रतिशरीरंभिन्नोविभुर्नित्य
श्चास्यमानसप्रत्यक्षः॥विप्रतिपत्तौसत्यांबुद्ध्यादिगुणलिंगकः॥तथाहिबुद्ध्यादयस्तावद्गुणाःसिद्धामनसागृह्यंतेतत्रानित्या
वेऽपिस्पर्शवद्वत्वेसतिकेंद्रियग्राह्यत्वात्रूपवत्॥गुणाश्चगुण्याश्रिताएव॥तत्रबुद्ध्यादयोगुणानभूतानांमानसप्रत्यक्षत्वा
त्॥येहिभूतानांगुणानतेमनसागृह्यंते॥यथारूपादयः॥नापिदिक्कालमनसांगुणाःविशेषगुणत्वात्॥येहिदिगादिगुणाःसं
ख्यादयोनतेविशेषगुणाः॥ततोहिसर्वद्रव्यसाधारणगुणाएवबुद्ध्यादयस्तुविशेषगुणाः॥गुणत्वेसत्येकेंद्रियग्राह्यत्वात्॥

×सच५

× ५२ नुमाने

तर्कदी १२ रूपत्वरा। अतो मदिगा दिगुणा। अतस्मादेस्योष्टस्योतिरिक्तो बुद्ध्यादीनां गुणी। ष्टद्रव्यासमवायी। प्रयोगश्च बुद्ध्यादयः पृथिव्या
द्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः। पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात्। यन्नैवं पृथिव्याद्यष्टद्रव्यादतिरिक्तद्रव्याश्रितानं तच्च ति
नासौ पृथिव्याद्यष्टद्रव्यानाश्रितो गुणः यथा रूपादिः इति केवलव्यतिरेकी। अन्वयव्यतिरेकी वा यथा बुद्ध्यादयः पृथिव्याद्यष्टद्र
व्यातिरिक्तद्रव्याश्रिताः पृथिव्याद्यनाश्रितत्वे सति गुणत्वात्। यो यदनाश्रितो गुणः स तदतिरिक्ताश्रितो यथा पृथिव्याद्य
नाश्रितः शब्दः पृथिव्यादिव्यतिरिक्ताकाशाश्रय इ ति तथा बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रयाः तादृ
पृथिव्याद्यष्टद्रव्यातिरिक्तं तद्वं द्रव्यमात्मा सिद्ध ः स च सर्वत्र कार्योपलंभाद्विभुः परममहत्परिमाणवान् नित्यश्च॥
विभुत्वान्नित्योसौ व्योमवत्। सुखादि वैचित्र्या त् प्रतिशरीरं भिन्नः॥ तस्य भोगायतनं शरीरं सुखसमवेत सुखदुःख
दृष्टवोलोकाः स्य यद्वच्छिन्ने आत्मनि जायते तत् भोगायतनं तद्वच्छरीरं। चेष्टाश्रयो वा शरीरं चेष्टा तु हिताहितार्थ
प्राप्तिपरिहारार्था क्रिया न तु स्पन्दनमात्रं। शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियं। अतीन्द्रियमिन्द्रियमित्युक्ते अनुमानकालाद
रिन्द्रियत्वप्रसंगः। अत उक्तं ज्ञानकारणमिति। तथापीन्द्रियार्थसन्निकर्षे प्रसंगः। अत उक्तं शरीरसंयुक्तमिति शरीरसंयुक्तं ज्ञानक
रणमित्युक्ते आलोकेपीन्द्रियत्वप्रसंगः। अत उक्तमतीन्द्रियमिति। तानि चेन्द्रियाणि षट् घ्राणरसनचक्षुस्त्वक्श्रोत्रमनां
सि तत्र गंधोपलब्धिसाधकमिन्द्रियं घ्राणं नासाग्रवर्त्ति तच्च पार्थिवं गंधवत्त्वात् घटवत्। गंधवत्त्वं च गंधग्राहकत्वाद्यथाय

× द्द का १ २३

न्द्रियं रूपादिषु पंचसु मध्ये गंधगुणं गृह्णातीति तदिन्द्रियं तद्गुणवत् यथा चक्षू रूपग्राहकं रूपवत्। गंधग्राहकं तच्च घ्राणमित्यतो गंध
वत्। रसोपलब्धिसाधनमिन्द्रियं रसनं जिह्वाग्रवर्त्ति तच्चाप्यं रूपादिषु पंचसु मध्ये रसस्यैवाभिव्यंजकद्रव्यत्वात्। लालावत्। रू
पोपलब्धिसाधकमिन्द्रियं चक्षुः कृष्णताराग्रवर्त्ति तच्च तैजसं। रूपादिषु पंचसु मध्ये रूपस्यैवाभिव्यंजकत्वात् प्रदीपवत्। स्प
र्शोपलब्धिसाधकमिन्द्रियं त्वक् सर्वशरीरव्यापि तच्च वायवीयं रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात् अंगसंगिसलि
लशैत्याभिव्यंजकव्यजनपवनवत्। शब्दोपलब्धिसा धकमिन्द्रियं श्रोत्रं तच्च कर्णशष्कुल्यवच्छिन्नमाकाशं स च न द्र
व्यांतरं शब्दगुणत्वात्। तदपि शब्दग्राहकत्वात् यदिं द्रियं रूपादिषु पंचसु मध्ये यद्गुणग्राहकं। तत्तद्गुणयुक्तं य
था चक्षुरादि रूपादिग्राहकं रूपादियुक्तं शब्दग्राह कं च श्रोत्रं। अतः शब्दगुणकं। ननु चक्षुरादीन्द्रियसद्भावे किं प्र
माणं। उच्यते। अनुमानमेव तथाहि रूपाद्युपलब्धयः करणसाध्याः क्रियात्वात् छिदा क्रियावत्। अर्थाः षट्पदार्था
द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमाणादयो यद्यप्येतेष्वेवान्तर्भवंति तथापि प्रयोजनवशाद् इह तत्संकीर्त्तनं। तत्र
समवायिकारणं द्रव्यं। गुणाश्रयो वा द्रव्यं तानि च द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसीति नवैव। तत्र पृथि
वीत्वसामान्यवती पृथिवी। काठिन्यकोमलत्वादिनानावयवसंयोगविशेषवत्युक्ता घ्राणशरीरस्थावरपाषाणादिरूपा गंध
रूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती। सा च द्विविधा नित्यानित्या च। तत्र नि

१०.

तर्कसं १२

तत्रसा परमाणुरूपा नित्या कार्यरूपा द्विविधायामपि पृथिव्यां गंधरूपरसस्पर्शा अनित्याः पाकजाश्च पाकस्तेजःसंयोगस्ते
न पृथिव्यां पूर्वरूपादयो नश्यंति अन्ये उत्पद्यंते इति पाकजाः॥ अप्सु मामाप्युक्ता आपः परमसने द्रियमवि अग्रुद्धसिकरकादि
रूपा गंधवर्जा स्नेहयुक्ताः सर्वे गुणा वह्नि॥ ताश्चापि नित्या नित्याश्च नित्या नां रूपादयो नित्याः॥ अथ तेजस्सामान्यमाह उष्णस्पर्शवत्तेजः
विरुद्धवर्णवह्निविद्युदादिप्रभेदं रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत् नित्य
मनित्यं च पूर्ववत्॥ तच्च त्रिविधं उद्भूतरूपस्पर्शं यथा पिंडितं तेजो वह्न्यादिकं सुवर्णं तु उद्भूतानभिभूतरूपस्प
र्शं अनुद्भूतरूपं चक्षुर्वा दीप्तिमत्यां च अनुद्भूतस्पर्श चेद्यदानग्राह्यता किं विद्युत्पलीसग्धविलिनवागाद्य निलवसु
न लब्धसजातीयेन पार्थिवरूपेण स्पर्शेन च हतं अनुद्भूतरूपस्पर्शं तेजो यथा चक्षुरिंद्रियं॥ अनुद्भूतरूपमु
द्भूतस्पर्शं यथा तप्तवारिस्थं तेजः उद्भूतरूपमनुद्भू तस्पर्शं यथा प्रदीपप्रभामंडलं॥ वायुं लक्षयति संवंधवान् वायु
र्वा ये गिंद्रियं प्राणवातादिप्रभेदं स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगवान् अरूपस्पर्शवान्वयः त
थाहि योयं वायो वाति सति अनुष्णाशीतस्पर्श उपलभ्यते स गुणो वायुगुणः न संभवति गुणो तु पप्यमानो गुणिनमंतरेणाप्यति
गुणाश्च वायुरवपृथिव्याद्य उपलब्धेः पृथिव्यादीनां वायुव्यतिरेकेणानुष्णाशीतस्पर्शाभावात् स च वायुर्द्विविधो नित्यानि
त्यभेदात् नित्यः परमाणुरूपः अनित्यः कार्यरूपः तत्र पृथिव्यादीनां चतुर्णां कार्याणां उत्पत्तिविनाशक्रमः कथ्यते तथाहि १२

×वी१

श्री ३

द्वयोः परमाण्वोः क्रियाक्रियायां संयोगे सति द्व्यणुकमुत्पद्यते तस्य परमाणू समवायिकारणे तत्संयोगोऽसमवायिका
रणं अदृष्टादि निमित्तं तत्र त्रयाणां द्व्यणुकानां क्रियया संयोगे सति त्र्यणुकमुत्पद्यते तस्य द्व्यणुकानि समवायिकारणा
नि संयोग असमवायि॥ एवं चतुरणुकेषु त्र्यणुकैः परमाणुसंस्थूलतमं एवं क्रमेण महापृथिवी जायते महत्यापो महत्तेजः महांश्च वा
युः कार्यगतारूपादयस्त्वाश्रयसमवायिकारणगतेभ्यो रूपादिभ्यो जायंते कारणगुणा हि कार्यगुणानारभंते इति न्याया
त्॥ इदं तु प्रत्यक्षरूपादिमतः कार्यद्रव्यस्य॥ घटादेर्द्रव्यस्य कपालादौ नोदनादिना क्रियातस्तद्धि क्रियात
या विभागः ततो नाशत्वे यथा रुक्मस्य असमवायिका रणीभूतस्य संयोगस्य नाशः क्रियातो न तत्कार्यद्रव्यस्याव
यविनो घटादेर्नाशः क्रियते एते न समवायिका रणनाशात् द्रव्यनाशादर्शितः क्वचित् समवायिकारणना
शेनापि द्रव्यनाशो यथा प्रतीक्ष्यस्य पृथिव्यादेः सं दाहसंशीर्णपर्णमादृश्यद्रव्यस्य संशीर्णपतापुष्प क्रियातया
विभागः॥ विभागात् संयोगनाशाद्व्यणुकस्य द्व्यणुकनाशात् त्र्यणुकादिनाशक्रमेण पृथिव्यादिनाशक्रमः॥ यथा तंतुदा
हे पटः तद्गतानां रूपादीनां स्वाश्रयनाशान्नाशः अयं च संक्षेपेण वा आश्रयविनाशाद्गुणनाशो न विनाशः यथा पा
केन घटादेः रूपादिनाशः किं पुनः परमाणुसद्भावे प्रमाणं उच्यते यदिदं जालसूर्यमरीचिस्थं सर्वतः सूक्ष्मतमं रज उपल
भ्यते तत्स्वल्पपरिमाणद्रव्यारब्धं कार्यद्रव्यत्वात् पटवत् तच्च द्रव्यं कार्यं महत् महद्द्रव्यारंभकत्वात् कार्यत्व नियमात् तदेवं द्व्य

×स्वल्पपरिमाण२१ ×नपत्सु

तर्कसं। २५

णुकार्यं द्व्यणुकं सिद्धं। तदपि स्वल्पपरिमाणसमवायिकारणारब्धं कार्यद्रव्यत्वात् घटवत्। यश्च द्व्यणुकारंभकः स एव परमा
णुरित्यप्रसंगेऽसमवायितारब्धत्वेति नवकार्यद्रव्यारंभकस्य कार्यद्रव्यव्याप्तिवगात् तत्कथममनारब्धत्वस्य त्वात्यनंतकार्यपरंपराप्र
सङ्गात्। तथा च सर्वस्यतं तद्द्रव्यारब्धत्वाविशेषणेन मेरुसर्षपयोरपि तुल्यपरिमाणत्वप्रसंगात्। तस्मादनारब्ध एव परमाणुः
द्व्यणुके तु द्वाभ्यां परमाणुभ्यामारब्धता एकस्यानारंभकत्वात्। आदिकल्पनायां प्रमाणाभावात्। द्व्यणुकारंभकं तु द्वयं त्रि
त्वं द्व्यणुके। त्र्यणुकं तु एकस्यानारंभकत्वात्। द्व्य णुकस्यारंभकत्वे महत्त्वानुपपत्तिप्रसंगात्। कार्यमहत्त्वं
कारणमहत्त्वात्। कारणबहुत्वाद्वा। तत्र प्रथमस्य प्रचयसंभवात्। चरमे पि तथा। न च चतुरादिकल्पनायां प्रमा
णमस्ति त्रिरेवमस्त्वारोपपत्तेरिति। शब्दगुण माकाशं। पंच शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभाग
कमाकाशं एकं विभु नित्यं शब्दलिंगकं च शब्दलिंगकमस्मक थंपारिशेष्यात्। तथा हि शब्दः क्वचिदाश्रितो गुणः। अस्पर्शवद्विशेषगुण
त्वशेषसर्वसंमतमदादिबाह्येंद्रियग्राह्यत्वात् रूपादिवत् ... न तावत् स्पर्शवतां पृथिव्यादीनां विशेषगुणः आत्मगुणो
न विभुर्महत्त्वे श्रोत्रग्राह्यत्वात्। शब्दस्य हि पृथिव्यादिगुणत्वे श्रोत्रेण ग्रहणं न स्यात् यथा रूपादयः। शब्दः श्रुत्या ग्रहणात् आत्म
न तद्गुणाः तु। नैव दिक्कालमनसां गुणः विशेषगुणत्वात्। अतः परिशेष्यात् शब्दस्य गुणत्वमीयात्। स एवाकाश इति स
वैको ऽसावेकमानानात्वात्। एकत्वेनोपपत्तेः एकत्वेनोपपत्तेः एकत्वेनाकाशं चैकमस्मात् ... विघातः

प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेषः।५ १३

२।६ ये तनिते २

श्री सामान्यवत्त्वे सत्यनेकद्रव्यत्वाभावः। विभुत्वाकाशं परममहत्परिमाणवदित्यर्थः। सर्वेषां कार्याणां शब्दस्योपलब्धेः। अतीतानागतव्यव
हारनिमित्तत्वमपि कालादिष्विपरीतपरत्वापरत्वासमवायिकारणं। संख्यापरिमाणपृथक्त्वसंयो[विभागाः] गतः कालो नित्यो विभुश्च
यमस्य विपरीतपरत्वापरत्वोत्पादकस्य संयोगस्याश्रयः कालः। सन्निहिते देहे संनिकृष्टादपरत्वाद्विपरीतं परत्वं प्रतीयते। यत्कदाचित्
यवधानात्परत्वाद्विपरीतापरत्वं प्रतीयते। तदिदं दिक्कृतविपरीतपरत्वापरत्वं च कार्यं तत्कारणस्य दिगादिरेव सर्व
त्रा कालमेव कारणमनुमापयतीति। स चैकोऽपि वर्तमानातीतादिव्यवहारक्रियोपाधिवशात्। वर्तमानादिव्यप
देशं लभते। प्राच्यादिव्यवहारक्रियोपाधिवशात्। ग्रापाचकयाजकादिव्यपदेशं नित्यत्वविभुत्वे वायुवदेव
दिक्कालौ नित्यौ विभू च। संख्यापरिमाणपृथक्त्वसंयो गविभागगुणवती। पूर्वादिदिक्प्रत्ययहेतुरस्याः तेषां मध्ये निमित्त
गविभागाः पंचैव गुणाः नित्या विभुश्च तस्मादेवास्याः। उपाधिकादिविरोधीस्यविशेषकस्य देशसंयोगोपाधिवशात्।
व्यादिसंज्ञां लभते। आत्मा ज्ञानाधिकरणमात्मा सुखदुःखादिविविक्तज्ञानाश्रितत्वात्। तस्य सामान्यगुणाः संख्यादयः
पंच विशेषगुणा बुद्ध्यादयो नव विशेषगुणाः। नित्यश्च विभुश्चेवात्मा सर्वदेहावच्छिन्नसंबंधश्च मनसः अणु संयोगीश्रीति द्वि
यं सुखाद्युपलब्धिकारणं। नित्यं संख्यादिपंचगुणवत्परत्वापरत्ववेगवत् तत्संयोगेन बाह्येन्द्रियमर्थयुक्तं एव
परस्यापि साधकं तत्र। अपि मानागम्यं। तथा हि सुखाद्युपलब्धयः करणसाध्याः क्रियात्वात् छिदिक्रियावत् करणसाध्याः अपि च

×६५

तर्कसा
२५

रादिषु जायमानत्रासायस्य सुखाद्युपलब्धिकारणं तन्मनः॥ तच्चाणुपरिमाणं द्रव्याणि उक्त्वा निरूप्य गुणानुयंतामासमन्यथाम
समवायिकारणमन्यद्वा सामान्यगुणाः सवद्रव्याश्रिताः॥ रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरु
त्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारभेदाच्चतुर्विंशतिगुणाः तत्र रूपं चक्षुर्मात्रग्राह्यो गुणविशे
पृथिवीजलयोः
षः॥ पृथिव्यादित्रयवृत्ति॥ तच्च शुक्लाद्यनेकप्रकारं पाकजं पृथिव्यामनित्यं च॥ आप्यतैजसपरमाणौ नित्यं आप्यतैजसकार्ये
येष्वनित्यं शुक्लमाप्ये अभास्वरं तपाकजमपि शुक्लं भा कार्येऽपाकजं तत्र अपि रसो रसनेन्द्रियग्राह्यो गुणविशेषः पृ
वह्नि
अस्वरं वह्नौ॥ तत्र पृथिव्यां मधुरादि षट्प्रकारः पाक अयं पृथिव्यामस्य मधुरो रसोऽपाकजो नित्यादि नित्यात्मा॥
नित्यपरमाणुस्वतार्थस्तु कार्याद्यनित्य इति गंधो घ्राणग्राह्यो गुणविशेषः पृथिवीमात्रवृत्तिः सुरभिरसुरभिश्चेति
द्विविधः सुरभिरसुरभिश्च जलादौ तु गंधप्रतीति मृत्संयुक्तसमवायेन तद्गृह्यते स्पर्शस्त्वगिन्द्रियग्राह्यो गुणः पृ
थिव्यादिचतुष्टयवृत्तिः स च त्रिविधः॥ शीतोष्णानुष्णाशीतभेदात् तत्र शीतो जले उष्णस्तेजसि अनुष्णाशीतः पृथिवीवाय्वोः
थ्वीमात्रे इत्यनित्यः॥ आप्यतैजसवायवीयपरमाणुषु नित्यः॥ आप्यादिकार्येष्वनित्यः॥ एतत्तु रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च का
समवेतत्वे सत्यद्भुतरूपादेव प्रत्यक्षा॥ संख्या एकत्वादिव्यवहारहेतुः सापि सामान्यगुणः एकत्वादिपरार्धपर्यन्ता॥ तत्रैक
त्वं द्विविधं नित्यानित्यभेदात्॥ नित्यगतं नित्यं कार्यगतं त्वनित्यं आश्रयसमवायिकारणैकत्वजन्यं द्वित्वमनित्यमेव तच्चा

२३

योः पिंडयोर्द्वित्वमेकं इत्यपेक्षाबुद्ध्या जन्यते तत्र पिंडौ द्वौ समवायिकारणे पिंडयो(गुरु)रेकत्वे असमवायिकारणे अपेक्षाबुद्धिर्निमि
त्तं अपेक्षाबुद्धिविनाशादेव द्वित्वविनाशः॥ एवं त्रित्वाद्युत्पत्तिः॥ परिमाणं मानव्यवहारकारणं॥ तच्चतुर्विधं अणु महत्॥ दीर्घं
ह्रस्वं चेति तत्र कार्ये परिमाणं संख्यापरिमाणप्रचययोनिप्रचयात्॥ द्व्यणुकपरिमाणं ईश्वरापेक्षाबुद्धिजन्यपरमाणुद्वित्वज
नितत्वात्॥ संख्यायोनिसंख्याकारणमित्यर्थः॥ त्र्यणुकपरिमाणं स्वाश्रयसमवायिकारणगतबहुत्वसंख्यायोनित्वं
त्र्यणुकादिपरिमाणं स्वाश्रयसमवायिकारणपरिमाणजन्यं॥ तूलपिंडपरिमाणं प्रचययोनि प्रचयस्तु स्वा
श्रयसमवायिकारणावयवानां प्रशिथिलसंयोगः॥ परमाणुपरिमाणं परममहत्परिमाणं चाकाशादिगतं नित्य
मेव पृथक्त्वं पृथग्व्यवहारकारणं॥ तच्च द्विविधं एकपृथक्त्वं द्विपृथक्त्वं चेति तत्राद्यं नित्यानित्यं नित्यमनित्याश्रयमनि
त्यं॥ द्विपृथक्त्वादिकमनित्यमेव संयोगः संयुक्तव्यवहारहेतुः स चाश्रयोऽव्याप्यवृत्तिश्च अयं तु कर्मजः अन्यतरक
र्मज उभयकर्मजश्चेति त्रिविधः॥ तत्राद्यस्तु कर्मजो यथा क्रियावता निष्क्रियस्य॥ श्येनो यथा स्थाणुना सह संयोगः तस्य श्येनेन समवायिकार
णं श्येनसमवेता क्रिया असमवायिकारणं उभयकर्मजो विरुद्धदिक्क्रिययोर्मेषयोः संनिपातः यथा मल्लयोर्मेषयोः संयोगः संयोगजस्तु संयोगजस्तु संयोग
संयोगात्कार्यसंयोगजः कपालतरुसंयोगात्कायतरुसंयोगः कार्याकार्यसंयोगो यथा कारणसंयोगिभिः अकारणैः कारणाकारणसं
योगपूर्वकः कार्याकार्यगतः संयोगः पृथक्त्वमात्र संयोगाद्भवति एककर्माजा द्वयजश्च वीरणसंयोगपूर्वकः कार्याकार्ये

संयोगजः॥

तर्कसं॰ पत्रसंयोगाद्वितंतुवीरणसंयोगो द्वाभ्यां तद्वाकाशसंयोगाभ्यां द्वितंत्वाकाशसंयोगाभ्यां द्वितंत्वाकाशसंयोगः खंडस्य च तंतु

२८ त्वसंयोगोत्पत्तिः। एकः प्रस्तरसंयोगः। एकस्माद्द्वयोरुत्पत्तिः। यदा पार्थिवाप्ययोरणुसंयोगमत्यन्तपार्थिवेन पार्थि

वस्याप्यैतवाप्यस्य द्व्यणुकसंयोगो लवत। तद्वाभ्यां संयोगाभ्यां पार्थिवाप्यद्व्यणुकयुगपदुत्पन्नेन तत्राय भिन्ने वका

लद्व्यणुकयोः कारणाकारणकर्मणा रूपाद्युत्पत्तिश्च तस्मिन्नेव काले उत्पत्तरत्कारणगुणात्संयोगाद्वितंतरकार्याकार्य

गतो संयोगो युगपदुत्पद्यते। किं कारणाकारण संयोगेनाहिकार्यमवयवं। विभागो विभक्तप्रत्ययव्यवहारहेतुः

संयोगपूर्वकाद्व्याश्रयश्च सोपि त्रिविधः। अन्यतरक र्मजः। उभयकर्मजः। विभागजश्चेति। तत्र प्रथमो यथा शैले

नश्येनक्रियया शैलश्येनविभागः द्वितीयो यथा मेष योस्संयुक्तयोर्विभागः। तृतीयो यथा हस्ततरुविभागात्काय

तरुविभागः स च। नित्यः परत्वापरत्वे परापरव्यवहारहेतुका रणे। तदु द्विविधे दिक्कृते कालकृते च। तत्र दिक्कृतयो

रुत्पत्तिः कथ्यते। एकस्यां दिशि अवस्थितयोः पिंडयोर्दूरसमीपाभिज्ञानिकृष्टमित्यादि बुद्ध्यापेक्षया उत्पत्ति न दिक्पिंडसंयो

गेन अपरत्वं संनिकृष्टे जन्यते। विप्रकृष्टे बुद्ध्या उपरत्वं विप्रकृष्टे जन्यते। संनिकृष्टत्वं तु पिंडस्य द्रष्टुः शरीरापेक्षया दिक्

संयुक्तसंयोगाल्पीयस्त्वं। तद्भूयस्त्वं विप्रकर्षः। कालकृतयोः परत्वापरत्वयोरुत्पत्तिः कथ्यते। अनियतदिदेशावस्थितयोर्यु

वस्थविरपिंडयोरयमस्मादल्पतरकालेन संबंध इति बुद्ध्या अपेक्षया यूनीति न कालपिंडसंयोगेन असमवायिकारणेन अ २८

मिथपरत्वं। अयमस्माद्बहुतरकालसंबंध इति धिया स्थविरपरत्वापरत्वे द्वे अनित्ये। गुरुत्वमाद्यपतनासमवायि

कारणं। पृथिवीजलवृत्तिर्यथा फलं वृंतफलसंयोगाभावे गुरुत्वात्पतनं। गुरुत्वसंयोगवेगप्रयत्नाभावे अत

गुरुत्वात्पतनं। तच्च द्विविधं पार्थिवाप्यपरमाणुगतं नित्यं तदीयकार्यगतमनित्यं द्रवत्वं चाद्यस्यंदनासमवायिकारणं। स्वतेज

जलवृत्ति। घृततजसोर्घृतलाक्षादिसुवर्णादीनामग्निसंयोगेन द्रवत्वान्नैमित्तिकं। जले तु सांसिद्धिकमेव। आप्यपरमाणौ नित्यं। अन्य

त्रानित्यं। द्व्यणुकादिपरमाणौ चानित्यं स्नेहश्चिक्क णतापिंडीभावहेतुर्गुणः जलमात्रवृत्तिः। कारणगुणपूर्वकः गुरुत्वादिव

द्यावद्द्रव्यभावी आप्यपरमाणौ नित्यश्च कार्ये ष्वनित्यः॥ शब्दः श्रोत्रग्राह्य आकाशविशेषगुणः। तत्क

थमस्य श्रोत्रेण ग्रहणं। यावन्नासैर्यादिदृष्टा॥ द्वोत्पद्यते। श्रोत्रेंद्वरूपद्वारशब्दस्यत्व। अतस्त्विदितदेशा

न्तः शब्दो वीचीतरंगन्यायेन कदंबमुकुलन्यायेन वा ष्वसंनिहितशब्दांतरमारभते। समशब्दस्त्वशब्दांतरं श्रोत्रसम

वायेदेशे जातः स शब्दः श्रोत्रेण गृह्यते। न त्वाद्यः नापि मध्यमः। एवं भेरीदेशोपाद्यमात्रसंलम्ब्यविभागदेशजातः शब्द

शब्दांतरारंभकः। श्रोत्रदेशेत्पन्नः शब्दः श्रवणं याति। अंत्यः शब्दः श्रोत्रेण गृह्यते। नाद्यो नापि मध्यमः। भेरीशब्दो मया श्रु

त इति प्रतीतेश्च शब्दो नैव वीचिसंगक्रमेणागच्छन्नोपसर्पति शब्दोत्पत्तौ भेर्याकाशसमवायिकारणं। भेर्याकाशसंयोगोसम

वायिकारणं। भेरीदंडसंयोगो निमित्तं वंशपाटनोत्पन्नवटपटाशब्दोत्पत्तौ वंशदलाकाशविभागोसमवायिक॰

तर्कको॰
२१

णी॥ द्रवत्वहेतुरिति सिद्धकारणं श्रोत्रमात्रग्राह्यः शब्दः॥ संयोगजो विभागजो वा शब्दः मध्यमस्तु शब्दजः समवायिकारणकाः॥ अत्र तु कल
तादिति सिद्धकाः॥ तथा चोक्तं॥ संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिरिति॥ अत्र चाद्यौ तं सर्वशब्दानां आकाशः समवायिकम
वायिकारणं कर्णशष्कुलीशब्दानां द्विविधानां मात्रस्पर्शविशिष्टवायुराद्यमध्यशब्दाः कार्यशब्दनाशाः॥ अन्ते त्वसमवायिनाशात्
न्यनस्पंदोपसंदवायेन विनाशः पतञ्जलिर्युक्तं उपात्येन त्रिक्षणवृत्तित्वमिति चाद्यन्ता हिती यक्षणे उत्पन्नोऽसमवायि हेतुनाशे
नाशं तं वुनाशजनाशजनानां संस्कारः॥ तास्माद्
न्न॥ तथा द्विशब्दः अनित्यः सामान्यवत्त्वे सति अस्मदा
ध्वंसेऽत्र नित्यश्च विनाशावच्छिन्नद्वयं प्रत्यक्षमवस्तु
त्वादात्मसंयोगासमवायिकारणकत्वमस्मदादिबाह्यें॥
पीत्यनाशादेवान्त्यनाशज्ञविभिना शब्दे वशब्दस्यानुमाना
दिबाह्येन्द्रियग्राह्यत्वाद्घटवत्॥ अत्र च संशब्दो नित्यत्वं स
विनाशावच्छिन्नसत्तायोगात्॥ प्रागभावसत्ता विद्यते अनित्य
न्द्रियग्राह्यत्वं हेतुः प्रत्यक्षवादिनामात्मनामप्यनित्य
त्वस्यापत्त्या तत्त्वतं वाह्येन्द्रियमितिप्रथमपि योगिनां बाह्येन्द्रियग्राह्यत्वाल्लिङ्गे वा दृश्यादिस्याता योगीन्द्रियेति सत्तायास्तस्य
वादीनामिति॥ किं चानयो नित्यद्रव्यविशेषगुणत्वेन प्रमाणं वाच्यं कस्य विशेषस्य॥ प्रत्यक्षत्वात् घटरूपवत्त्वापि सामान्य
वत्त्वात्मनि यावत्स्यादित्यत उक्तं सामान्यवत्त्वे सति तस्मादोत्यादित्वप्रत्यक्षत्वमित्यस्यार्थः॥ अथ प्रकाशार्थं द्विः प्रीति सुखं वा
सर्वेषामनामनुकूलवेदनीयं॥ पीडा दुःखं॥ तं सर्वेषामेव मनः प्रतिकूलवेदनीयं॥ इच्छा॥ क्रोधो द्वेषः॥ उत्साहः प्रयत्नः॥ बु २१

द्यादयः प्रयत्नाः प्रत्यक्षाः अपरत्वमस्यासाधारणकारणो धर्माधर्मौ तौ चाप्रत्यक्षौ वाच्या गमगम्यावेव मानगम्यौ चादेव
दत्तस्य शरीरादिकं देवदत्तविशेषगुणजन्यं कार्यत्वे सति देवदत्तस्य भोगहेतुत्वाद्यथा देवदत्तप्रयत्नजन्यं वस्तु वदिति धर्म
श्चाशरीरादिजनक आत्मगुणः स एव धर्माधर्मश्च प्रयत्नादीनां शरीराद्यजनकत्वात्॥ संस्कारस्त्रिविधः॥ वेगो भावना स्थितस्था
पकश्चाः॥ तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः क्रियाहेतुः॥ भावनाख्यस्तु संस्कारः आत्ममात्रवृत्तिः अनुभवजन्यः स्मृतिहेतु
॥ स वा दृष्ट एव स्मृतिं जनयति उद्बोधश्च सहकारि
सहशादृष्टचिन्तादयः स्मृतिबीजस्य बोधकाः॥ उ
पेक्षधर्ममदः प्रतिबन्धादेव स्थापादकाः॥ एतेषु
इदानीं कर्मणां उच्यते॥ चलनात्मकं कर्मगुणादि
लाः स्मृतिसहकारिणस्तु संस्कारस्य सदृशदर्शनादयः॥ यथोक्तं
तिस्थितस्थापकश्च स्पर्शवद्विशेषगुण इति॥ अन्यथा कृतस्य पुन
स्तादवस्थ्यधर्मा ललाव तात्मविशेषगुणाः॥ एवं गुणा उक्ताः॥
वद्द्रव्यमात्रवृत्ति विभागविभिन्नद्रव्यपरिमाणेन मूर्तत्वापन्नत्वात्॥ मते
कार्यमसमवेतं विभागद्वारा पूर्वदेशसंयोगनाशे सत्युत्तरदेशसंयोगहेतुश्च॥ तच्चोत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमन
लक्षणं पञ्चधा॥ भ्रमणादयस्तु गमनग्रहणेनैव गृह्यन्ते॥ अत्र उत्क्षेपणत्वप्रत्ययहेतुः सामान्यं द्रव्यादित्रयवृत्ति नित्यमेकमनेक
समवेतं॥ सद्विविधं॥ परमपरं चात्र परं सत्तावत् व्यापकविषयत्वात्॥ सा वा द्रव्यादिभिन्नेषु द्रव्येषु वा॥ सामान्यमात्रं परं द्रव्यत्वादिकमत्य
विषयत्वात्॥ तदुक्तं परापरविशेषहेतुत्वात्॥ सामान्यविशेषाख्यत्वं कश्चिदाह॥ अकिंचनमिति नित्यसामान्यं नास्तीति॥ अत्र परमाणुः किं मौली

तर्कसं तर्हि भिन्नेष्वविलक्षणेषु पिंडेष्वेकाकारबुद्धिर्विना सर्वानुगतमेकं तदेवं च सामान्यमिति तेन तत्सामान्याद्व्यतिरिक्ते विका
१८ काराबुद्धिः स्यात्तथा हि सर्वेष्वपि गोपिंडेषु गौरयं गौरित्यनुवृत्तिप्रत्ययो भवति तेन गोत्वमिति विषयतयैकाकारप्रत्ययो भ
केषु गोपिंडेषु न तु विशिष्टरूपगोत्वसामान्यविषयः॥ नैवं विशिष्टत्वेनैवैकाकारग्रहणाभावविशेषा नित्यद्रव्यवृत्तयो व्यावर्त्त
बुद्धिमात्रहेतवः॥ नित्यद्रव्याणि आकाशादीनि पंच पृथिव्यादयश्चत्वारः परमाणुरूपाः॥ अयुतसिद्धयोः संबंधः समवायः
स चोक्त एव॥ अवयवावयविनावयुतसि द्धौ तेन तयोः संबंधः समवाय इति॥ वक्ष्यते ह्येकं त्ववयवा॥
तिरिक्तस्यावयविनोऽभावात्॥ परमाणवो हि था तथाभूतं संनिकृष्टा द्व्यणुकघटो घटपटो घटमिति त्रसरे
८० अधिकं द्व्यणुके घट इति प्रत्यक्षात् बुद्धिः॥ न च परमाणुष्वतीन्द्रियेषु अस्तु लेशः अतीन्द्रियेषु विषु
ईति॥ भ्रान्तेयं बुद्धिरिति चेन्न बाधकाभावात्॥ तदेवं षट्पदार्थाः द्रव्यादयो वर्णिताः॥ तत्र विशिष्टस्य प्रत्ययस्य
घवाद्भावरूपा एव॥ इदानीं निषेधमुखप्रमाणगम्योऽभावस्वरूपः सप्तमः॥ पदार्थः प्रतिपाद्यते॥ स च अभावः संक्षे
पतो द्विविधः संसर्गाभावोऽन्योन्याभावश्च॥ संसर्गाभावस्त्रिधा प्रागभावप्रध्वंसाभावात्यन्ताभावश्च॥ उत्पत्तेः प्राक्का
रणे कार्यस्याभावः प्रागभावः॥ यथा तंतुषु पटाभावः॥ स चानादिः सांतश्च॥ विनाशी कार्योत्पादे तद्विनाशस्य प्र
उत्पन्नस्य कारणे योऽभावः प्रध्वंसाभावः॥ विनाश इति यावत्॥ यथा खंडघटे कपालमालायां घटाभावः॥ स च उत्प १८

रादिमध्यः सर्वोत्पत्तिमानविनाशी॥ प्रतियोगिनः पुनर्जन्मनाशानिर्दिष्टस्य त्रैकालिकोऽभावोऽत्यन्ताभावः॥ यथा वायौ रूपा
भावः॥ अन्योन्याभावस्तु तादात्म्यप्रतियोगिकोऽभावः॥ घटः पटो न भवतीति॥ तदेवमर्था विख्याताः॥ तज्ज्ञानात्स्वरूपा
व्यतिरिक्ता अर्था न संति॥ नैवं अर्थानामपि प्रत्यक्षसिद्धत्वात् सा का पुनः बुद्धिः॥ बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति प
र्यायवाचकैर्यदभिधीयते सा बुद्धिः॥ अर्थप्रकाशो वा बुद्धिः॥ सा च संक्षेपतो द्विधा॥ अनुभवः स्मरणं च॥ अनुभवोऽपि
द्विविधो यथार्थोऽयथार्थश्च॥ तत्र यथार्थोऽविसंवा दीयः प्रत्यक्षादिसिद्धानां ज्ञेयता यथा चक्षुरादिभिरुद्
ष्टैर्यथा दृष्टज्ञानं धूमादिलिंगज्ञानाद्वह्न्यादिज्ञानं॥ गोसादृश्यदर्शनाद्गवयशब्दवाच्यताज्ञानं॥ ज्योतिष्टो
मेन स्वर्गकामो यजेतेति वाक्यात्॥ ज्योतिष्टोमस्य स्वर्गसाधनत्वज्ञानं॥ अयथार्थस्तु अर्थे व्यभिचारी॥ अप्रमा
णजः॥ स त्रिविधः संशयस्तर्को विपर्यय इति संशयतर्कौ वक्ष्येते विपर्ययस्त्वतस्मिंस्तदिति ज्ञान
मिति यावत्॥ यथा शुक्तिकायां रजतं वा रज्ज्वादौ सर्पं रजतमिति॥ स्मरणमपि यथार्थमयथार्थं चेति द्वि
विधं तद्रूपवंशजात्॥ स्वप्नेऽप्यनर्थज्ञानं स्मरणमेव॥ अयथार्थं वा अयथार्थं तद्दोषवशात्॥ तदवस्थेऽर्थे च मिथ्यैव
॥ सर्वज्ञानं निराकारमेव॥ न तु ज्ञाने अर्थस्याकारोऽवज्ञायते॥ साकारज्ञानवादिनिराकरणाय॥ अन्यथा वा कार
णार्थानुमानमपि निरस्तं॥ प्रत्यक्षसिद्धत्वाद्घटादेः॥ सर्वं ज्ञानमर्थनिरूप्यं अर्थप्रतिबद्धस्यैव तस्य मनसा निरूपणात्॥ घट

तर्कदी०
१८

ज्ञानेनाहं न सुज्ञानवानहमिच्छेतावन्मात्रं जायते॥ अत्र विंद्रियं मनः। तद्वोक्कं मनःप्रवृत्तिः। धर्माधर्ममयी वागादिक्रिया॥
रागद्वेषमोहा दोषाः साधकत्वाद्दोषा रागद्वेषमोहाः॥ रागः इच्छा। द्वेषः क्रोधः इत्यादयः॥ मोहः मिथ्याज्ञानं विपर्ययः इति
व्यवहारतस्त्वविप्रेत्य भावः। सत्वात्मनो पूर्वदेहसंयोगं त्यागेन॥ फलं भोगः॥ सुखदुःखान्यतरः॥ पीडादुःखं ... मोक्ष
मोक्षोऽपवर्गः॥ स चैकविंशतिप्रभेदभिन्नस्य दुःखस्यात्यंतिकी निवृत्तिः॥ एकविंशतिप्रभेदास्तु शरीरं षडिंद्रियाणि षड्विषयाः
षड्बुद्धयः सुखं दुःखं चेति॥ गौणमुख्यभेदात्सुखं च दुःखमेव। दुःखानुषंगात्। अनुषंगो विना... ... प्र
प्रकारः॥ मधुनि विषसंयुक्ते मधुनो विषपक्षनिक्षे पत्वम्॥ सुखमनपवर्गः कथं ... ... शास्त्रादि ...
र्थत्वात्सम्यग्दोषदर्शनेन विरक्तस्य मुमुक्षोः कर्मणि प्रवृत्तिर्नोऽसनपरिपाकवशात्सम्यग्ज्ञानात्...
नस्य निष्काम धर्माद्यनुष्ठानात् ज्ञानात्तधर्माधर्मौ... वनार्जयतः पूर्वोपात्तधर्माधर्मप्रपंचक्षयः...
ह्विदिवा समाद्यभुक्तं ज्ञानस्य सर्वकर्मक्षयेनि हेतोर्वर्तमानशरीरापगमादुत्तरशरीराद्येकविंशतिदुःखसंबंधः...
कारणानामात्मा। नियमकविंशतिप्रभेदं दुःखं स्वहानिर्मोक्षोऽपवर्ग इति। इदानीं संशयमाह। एकस्मिन् धर्मिणि वि
रुद्धनानार्थविमर्शः संशयः। किमयं स्थाणुर्वा पुरुषो वा इति॥ द्वितीयस्त्रिधा। एको विशेषादर्शने सति समानधर्मदर्शनात्
था। स्थाणुर्वा पुरुषो वेति॥ एकस्मिन्नेव हि वाराव सितिरिद्ययं स्थाणुत्वनिश्चायकं वक्रकोटरादिकं पुरुषत्वनिश्चायकं च १८

शिरःपाण्यादिकं विशेषमपश्यतः स्थाणुपुरुषयोः समानधर्ममूर्ध्वत्वादिलक्षणं पश्यतः॥ भवति पूर्वमर्वाद्दिसंशयः॥
किमयं स्थाणुः पुरुषो वा इति॥ द्वितीयस्तु संशयो विशेषादर्शनात् सविप्रतिपत्तिजः॥ यथा किमयं शब्दो नित्य उतानित्य इति
तत्र हि एको भूतशब्दो नित्यः। परस्तु अनित्य इति तयोर्विप्रतिपत्त्या मध्यस्थितस्यापि सत्त्वा विशेषमपश्यतस्तावत् संशयः॥
किमयं शब्दो नित्य अनित्य इति असाधारणधर्मजन्यः संशयो यथा नित्यादनित्याच्च व्यावृत्तेन गंधवत्त्वासाधारणेन गंधव
त्त्वेन विशेषमपश्यतस्तावदेव पृथिवी नित्या अनित्या वा संशयः॥ तत्र हि स्वकवृत्तिनित्यव्यावृत्तेन गंधवत्त्वेन यावत्
किमनित्याउत्पन्नकला नित्या व्यावृत्तेन तेन योगात्स्ति त्येति संशयः॥ येन प्रवर्तितः तत्प्रयोजनं॥ तच्च सुखदुःखावाप्ति
परिहारौ॥ तदर्थो हि प्रवृत्तिसिद्धस्वरूपाः। वादिप्रतिवादि प्रतिवादि ज्ञातिप्रवृत्ति विषयो यो दृष्टांतः॥ स च द्विविधः साधर्म्य
दृष्टांतः प्रथमः॥ यथा धूमवत्त्वस्य हेतोर्महानसमिति द्वितीयस्तु वैधर्म्यदृष्टांतः॥ तथा तस्यैव हेतोर्महाह्रद इ
तिप्रमाणिकत्वेनाभ्युपगमसिद्धांतः स चतुर्धा॥ सर्वतंत्रसिद्धांतः प्रतितंत्रसिद्धांतः अधिकरणसिद्धांतः अभ्युपगमसिद्धांतः॥ तत्र सर्वतंत्रसिद्धांतो यथा सामान्यधर्मिमात्रसद्भावः॥ द्वितीयः प्रति
तंत्रसिद्धांतो यथा नैयायिकस्य मनस इंद्रियत्वं द्रव्यमानत्वं च वैशेषिकैः सिद्धं॥ अधिकरणसिद्धांतो यथा॥ क्षित्यादिक
र्तृसिद्धौ कर्तुः सर्वज्ञत्वं अभ्युपगमसिद्धांतो यथा॥ जैमिनीयस्य नित्यविचारे यथा॥ सच शब्दो गुण इति॥ अनुमानवा
क्यैकदेशा अवयवाः॥ तत्र प्रतिज्ञादयः॥ तथा च ज्ञायसूत्रं प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति॥

तर्ककौमु ...त्साध्यधर्मविशिष्टधर्मिप्रतिपादकं वचनं प्रतिज्ञा। यथा पर्वतो वह्निमानिति। पंचम्यन्तं लिंगप्रतिपादकं वचनं हेतुः। यथा धूमव-
२० त्त्वादिति। सव्याप्तिकं दृष्टान्तवचनमुदाहरणं। यथा यो यो धूमवान् स सोऽग्निमान् यथा महानसमिति। पक्षे लिंगोपसंहारवचनमुपनयः। यथा धूमवांश्चायमि-
ति तथा चायमिति वा। हेतुसाध्योपसंहारो निगमनं। तस्मादग्निमानिति। तस्मात्तथेति वा॥ एते च प्रतिज्ञाद्याः पंच अनुमानस्यावयवा
इति चावयवाः। ननु समवायादि इति चावयवाः। न ... अधिकारांशो ... समवायात ... केचन ... विषयत्वात् ...
कृत्यार्थयोर्ध्यानं मीमांसका रागाद्यपक्षप्रसंगमं। यथा ... घटो ... विषयत्व। ... तिमत्त्वा
यत्तर्कः प्रमाणानामनुग्राहकः। अयं पक्षे तमा ... तन्निरविरिति ... दिकाः ... अनिमिय
मितितदा ... प्रतियद्य ... विषयत्वा। अनग्नि कथाद्वद्धमापि ... विषयत्वादिति ... जनी। कि
यदा ... तर्कः ... अर्थः। वह्निमानस्य धूमवत्त्वा ... विषयसमिस्या वह्निमत्त्वजा-
ता। अतन्निमवप्रतिक्षेपाय ... मानस्य ... आहक इति ... केचिदाहुः तर्कः संशयः ... इति तन्ना
त्वात्कोटिविषयत्वात्तर्कस्य निर्णयो ... रणात्मतां तत्र प्रमाणानां फलं तत्त्वज्ञानं। कथा वादजल्पवितण्डा इति
धिकरणं न्यूनाधिका ... पंचकं ... निग्रहाः ... साधनविजिगीषुकथा जल्पः। ... यथा सं-
यमर्व निग्रहणमधिकरणी ... स्वपक्षस्थापनाहीना वितंडा। प
२१
पर्यं

... प्रमाणमा ... इति ... कथा ... स्वपक्षप्रतिपादकत्वा ...
... धर्मस्वादि ... केनापि ... हीना ... तेषु ... कति पयदेव रूपयोः ... समाना दि
नामिति। ... निकारिका ... प्रकरणसम ... कालात्ययदिष्ट ... सव्यभिचारोदयाः ... तथा ... पक्षधर्मता ... प्रती ...
सिद्ध ... सिद्धलक्षण ... पक्षपि ... सत्प्रतिपक्षा ... कार्यस्य ... तथापि यथा ...
कार्यत्वात् ... तानि ... साधने ... स्फुर ... तिसमर्थ ... भिन्ना ... व्याप्ति ... पिकारकः
रूपणमितिया ... तिस ... स्फूर्तिके ... कथा ... मा ... रक्ष ... पक्षी ... स्य ...
प्रयोगाः ... विरुद्धा ... पर्यय ... विरुद्ध ... विशेषा ...
वाद ... तथा ... अन्वयव्यतिरेकानंतिका ... पक्षधर्मता ... विशिष्ट ... स्वरूपाज्ञानाविन ...
असिद्धा ... स्वरूपासिद्धा ... आश्रयासिद्धः ... स्वरूपासिद्धः ... तनु ...
यो ... सिद्धा ... गगनारविंदं ... गगनारविंदमाश्रयः
... सिद्धः। तथाहि घटो नित्यः कार्यत्वात्। ... आश्रयस्य सत्त्वात्। कार्यत्वादिति हेतुनाश्रय
सिद्धः। सिद्धसाधन ... नित्यत्व ... नाश्च। ... तेषां न ह्येकरूपेण कश्चिदाश्रयो न भवति। ... मानस्य कि

हेतुसंदिग्ध।नाद्यपक्षेत्र न निर्णीतनर्थोपि संदिग्धं दिग्धेन्नायः प्रवर्त्तितो न च घट इ नित्यसंदेहाः स्थित्यनित्यत्वप्रतिपत्तित्वा
त् तेन यद्यपि स्वरूपेण घटो विद्यते तथापि नित्यत्वसंदेहासाधारणाभावात् आश्रयस्याश्रयासिद्ध्याद्दृष्टेः॥ स्वरूपासिद्ध
स्यासाधारणा॥ तयोर्हि हेतुराश्रयमात्रव्याप्यता यथा सामान्यं नित्यं कृतकत्वादिति कृतकत्व हेतुराश्रयासामान्य
सामान्यं सतेन सिद्धापि स्वरूपासिद्ध एव। सिद्धापि स्वरूपासिद्ध एव सिद्धा नयथा पृथिव्यादि चतुर्णां परमा
णवो नित्या गंधवत्वादिति गंधवत्वं पक्षीकृतेषु। मात्रवृत्ति पृथिवीमात्रवृत्तित्वात् अन्येषु गंधाभावात् स्वरूपासि
द्धत्वं तथा विशेषणासिद्ध विशेष्यासिद्धासमर्थवि शेषणासिद्धा॥ समर्थविशेष्यासिद्धादयः स्वरूपासिद्धस्य
तत्र विशेषणासिद्धा यथा शब्दो नित्यो द्रव्यत्वे सत्यस्पर्शवत्वात् तत्र द्रव्यत्वविशिष्टस्पर्शवत्वं हेतुस्तस्मिं
न्स्पर्शवत्वमात्रं शब्दे द्रव्यत्वं नास्ति तस्य गुणत्वात्॥ अतो विशेषणासिद्धः॥ तथा सति विशेषणद्वयस्य च विशिष्ट
स्य स्पर्शवत्वस्याभावात्। विशेषणाभावे विशिष्टस्याभावात्। यथा दंडमात्राभावे दंडविशिष्टपुरुषस्याभावः॥ तेन सत्य
स्पर्शवत्वविशिष्टस्य हेतोरभावात् स्वरूपासिद्धत्वं॥ विशेष्यासिद्धो यथा शब्दो नित्यः स्पर्शवत्वे सति द्रव्यत्वात्र
पि विशिष्टो हेतुर्न च विशेष्याभावे विशिष्टस्य स्वरूपमस्ति विशिष्टस्य हेतुरपि नास्त्येव॥ असमर्थविशेषणासिद्धो यथा शब्दो
नित्यो गुणत्वे सत्यकारणत्वात्॥ अत्र च विशेषणस्य न किंचित्सामर्थ्यमस्ति विशेष्यस्याकारणत्वस्यैव नित्यत्वसामर्थ्यात्॥

अतः असमर्थविशेषणो स्वरूपासिद्धस्तु विशेषणाभावे विशिष्टस्याभावात्॥ न तु विशेषणांशे तत्र शब्दो स्येवात्त
थं विशेषणाभावः समर्थाश्रयेवत्वे किंतु विशेषणां तादृक्वत्तो विशेषणांस च तिष्ठ [illegible] वद्धादन प्रयोजनत्वमसुणात्वं
निःप्रयोजनं असमर्थमिति निष्फलम्। असमर्थविशेष्यो यथा॥ अत्रैतदप्ययेन प्रयोगशब्दो विद्यते॥ अकारणत्वे सति गुणत्वा
त् अत्र विशेषणमात्रस्यैव। नित्यसाधने समर्थत्वाद्विशेष्यमसमर्थं स्वरूपासिद्धस्तु विशेष्याभावे विशिष्टस्याभावादि
शिष्टस्य हेतुत्वेनोपादानात्॥ शिष्टं सद्व्यभिचारी व्याप्यत्वासिद्धस्तु स एव नयत्र व्याप्तिर्नावगम्यते। स द्विविधः एकः सा
धनान्तरसहितः। अपरस्तु सोपाधिकः साधनसंबंधः॥ तत्र प्रथमो यथा यत्सत्तत्क्षणिकं यथा घटः संश्च वि
वादाद्भूतः शब्दादिरिति। अत्र हि शब्दादिः क्षणिकत्वं साध्यं संस्वत्वं हेतुः॥ तत्र सत्वे तत्क्षणिक
त्वेन सह व्याप्तौ प्रमाणमस्ति इदानीं व्याप्तिमद्वि तं बोध्याप्यत्वासिद्धः सदर्शनात्। तद्यथा स श्यामो मैत्रतनयः
मैत्रतनयत्वात् प्रदृश्यमानमित्रतनयवत् अत्र च हि मैत्रतनयत्वेन श्यामत्वे साध्यत्वेनावेत्रतनयत्वश्यामत्वे प्रयोजकं॥
किंतु शाकाद्याहारपरिणाम एव प्रयोजकस्तोपाधिरुच्यते। अतो मैत्रतनयत्वस्य श्यामत्वेन संबंधे शाकाद्याहारपरि
णाम उपाधिः यथा सद्धूमसंबंधश्चार्द्रेन्धनसंयोगः॥ अतो सोपाधिसंबंधस्य व्याप्तिर्नास्तीति॥ व्याप्यत्वासिद्धो मैत्रतनयत्वा
दिति हेतुः तथा परोपाधिव्याप्यत्वासिद्धो यथा क्रत्वंतर्वर्त्तिनी हिंसा अधर्मसाधनं हिंसात्वात् क्रत्वबाह्यहिंसावदत्र न्यत्रापि हिंसा

कि व्यधर्थेऽप्रयोजकं किंतु निषिद्धत्वमुपाधिः॥ इति सर्वत्रोपाधिसद्भावाद्व्याप्यत्वासिद्धोयं हिंसात्वं हेतुः॥ ननु साधना
व्यापकत्वे सति साध्यव्यापको यः स उपाधिरित्युपाधिलक्षणं तच्च निषिद्धत्वे नास्ति तत्कथं निषिद्धत्वमुपाधिरिति तन्न नि
चि षिद्धत्वेऽप्युपाधिलक्षणस्य विद्यमानत्वात्॥ तथाहि साध्यस्याधर्मस्य व्यापकं निषिद्धत्वं यत्र यत्राधर्मत्वं तत्र तत्रावश्यं
निषिद्धत्वस्य विद्यमानत्वात्॥ न च यत्र यत्र हिंसात्वं तत्र तत्रावश्यं निषिद्धत्वं क्रत्वंगहिंसायामनिषिद्धत्वात् अत्र क्रत्वंग
हिंसायां हिंसात्वं साधनमस्ति न त्वत्र निषिद्धत्वमिति न देवंविधस्यासिद्धा दर्शिताः॥ संप्रति विरुद्धः कथ्यते साध्यविपर्यय
व्याप्तो हेतुर्विरुद्धः यथा नित्यः शब्दः कृतकत्वात्॥ अत्र हि नित्यत्वं साध्यं तद्विपर्ययेणानित्यत्वेन कृतकत्वं व्याप्तं
यत्कृतकं तत्सर्वमनित्यमेव अतः साध्यविपर्यय व्याप्तत्वात्कृतकत्वाख्यो हेतुर्विरुद्धः॥ संशयहेतुरनैकान्तिकः सव्य
भिचार इति यावत् स द्विविधः साधारणानैकान्तिकोऽसाधारणानैकान्तिकश्चेति तत्र प्रथमः सपक्षसपक्षविपक्षवृत्तिः॥
यथा शब्दो नित्यः प्रमेयत्वादिति। अत्र प्रमेयत्वहेतुः सपक्षे नित्ये विपक्षे चानित्ये विद्यते सर्वस्यापि प्रमेयत्वादिति॥ असाधारणा
नैकान्तिकस्तु सपक्षविपक्षव्यावृत्तः यथा भूर्नित्या गन्धवत्त्वात्॥ अत्र गन्धवत्त्वं हेतुः सपक्षान्नित्या
न्नाद्विपक्षाच्चानित्याज्जलादेर्व्यावृत्तः॥ गन्धवत्त्वस्य पृथिवीमात्रवृत्तित्वात्॥ व्यभिचारस्तु लक्षणं तत्संशयात्सपक्षविप
क्षवृत्तित्वेऽसपक्षविपक्षाद्व्यावृत्तिर्विपक्षाद्व्यावृत्तित्वे नियमाभावो नैकान्तिकत्वात्॥ तस्यैव स्वपक्षाद्विपरीतत्वात्सप २२

न्नियमाभावे तन्नियमाभावाद्व्यभिचारः॥ संदिग्धः सपक्षविपक्षयोर्हेतोस्ताद्रूप्याद्वृत्तो वा यस्य प्रतिपक्षभूतं हेत्वन्तरं वि
द्यते स प्रकरणसमः॥ स एव सत्प्रतिपक्ष इत्युच्यते॥ तद्यथा शब्दोऽनित्यो नित्यधर्मानुपलब्धेरिति॥ अत्र तद्विपरीतार्थ
साधकं समानबलमनुमानान्तरं प्रतिपक्ष इत्युच्यते॥ तद्यथा शब्दो नित्योऽनित्यधर्मानुपलब्धेः॥ यस्तु न तुल्यबलेन त
त्प्रतिपक्षः तथाहि विपरीतसाधकमनुमानं त्रिविधं भवति उपजीव्यमुपजीवकमनुभयं च तत्राद्यं बाधकं बलवत्त्वात्॥ न
ह्यप्रमाणेनावधार्यमाणे धर्मिणि परमाण्वादाव नित्यत्वानुमितिः संभवति॥ आश्रयासिद्धेः॥ अनेनानुमाने
न परमाणुग्राहकस्यानुमानस्योपजीव्यत्वात्॥ अनुभयथा ऽस्योद्याः संभवात्॥ तस्मादुपजीव्यं बाधकमेव
उपजीवकं तु दुर्बलत्वाद्बाध्यम्॥ अनुभयं तु समबलं व्याप्तिमत्त्वात् तीव्रसत्प्रतिपक्षः तुल्यबलत्वात्॥ यस्य प्रत्यक्षा
दिप्रमाणेन पक्षे साध्याभावः परिच्छिन्नः स कालात्ययापदिष्टः॥ स एव बाधितविषय इत्युच्यते॥ यथाग्नि
रनुष्णः कृतकत्वाज्जलवत्॥ अत्र कृतकत्वं हेतुः॥ तस्य च यत्साध्यमनुष्णत्वं तस्याभावः॥ प्रत्यक्षेणैव परिच्छिन्नः॥
स्पार्शनेन्द्रियेणोष्णत्वस्य परिच्छेदात्॥ तथा परोऽपि कालात्ययापदिष्टः॥ यथा घटस्य क्षणिकत्वे साध्ये प्रत्यभिज्ञेयत्वं हेतुः॥ तत्रा
पि घटस्याक्षणिकत्वं तत्साध्याभावः क्षणिकत्वप्रत्यभिज्ञालक्षणप्रत्यक्षेण परिच्छिन्नं स एवायं घटो मया यो दृष्टः पूर्वमि
ति प्रत्यभिज्ञया पूर्वोत्तरकालसंबद्धनितसंस्कारसहकृतेन्द्रियजन्यया पूर्वापरकालकलनया घटस्य स्थायित्वपरिच्छेदात्॥

त॰

तस्य सिद्धान्दयः पंचदेशानामयथार्थप्रसाधनाभावादिरूपदीनत्वादिति । तन्मात्रं तन्माधर्य्येनेति । प्रलक्षणमप्यतिसं
भ किंदेताश्चयोः नित्यासिद्धयासिध्यसंतवान्नेपिश्चैवांतर्व्वैतीति निग्रहस्थानाधिकाः॥ तथाहि अनित्यासिद्धयाप्यत्रापि
सिद्धिविपक्षमद्धाहत्यमावाग्॥ सोपाधिकत्वाद्य । यथा गोलक्षणस्यपक्षस्यगोत्वेदिमाश्च । द्विमत्वेप्रयोजकं पक्षत्वेन
तथा आत्मसिद्धिः । सिद्धिः यथा गोलक्षणस्यशाबलेयत्वस्यगवामसत्वं । पिश्चरूपा सिद्धः यथा गोलक्षणस्य कशफत्वं
स्यति । श्लिष्टायां तरेणप्रयुक्तस्यशब्दस्य यथा शब्दे नित्यत्वाकाशाद्वादितिघटवदित्यकेकश्चिदेवमादयदिस
तकत्वतदेतुना घटवच्छब्दो नित्यस्यान्नेनेवहेतु नासहदत्वशब्दस्याभावयवापिस्यादुपकर्षसमादुदृष्टांतेना
तेनधर्मेणसाध्यार्थांतरं प्रकल्प्याहूषणाभिधानं लोयथा नवकंबलोयंदेवदत्त इतिवाक्यस्यसततानाभिप्रा
येणप्रयुक्तस्यार्थांतरमाशंक्य कश्चिद्दूषयति । नास्यास्ककवकं बलाः संतिदरिद्रत्वात् नवास्यासिद्धत्वम्
विसंवाद्यते । उक्तोत्तरवतिसवदोश्छलवादित्वज्ञीयते । अव्याघ्रतरंज्ञातिः । साध्यधर्मोत्कर्षसमादि भेदेनबहु
विस्तरनियातेदकर्ष्णोद्यते । तत्रयथाप्तेनदृष्टांतगतधर्मेणसाध्येव्यापकधर्मस्यापादनमुत्कर्षसमाज्ञातिः यथाप
कस्यधर्मस्यापादानमपकर्षसमा । जातिः । यथा सर्वेस्मिन्नेवानुमाने कस्मिंश्चिदेवमादयदिकृतकत्वेनेदत्वेन
घटशब्दोतस्यात्रातिनिवदेहेतुनापटवच्छब्दः श्रावणो नस्यात्रातद्विपटोपिश्रावणइतितदाप्रसंजयदेस्तुतिमादष्टा २

नंतद्यन्मूनाधिकापसिद्धांतार्थांतराप्राप्तमतानुज्ञानविराधादिभेदाद्बहुविधमपि विस्तरभियान्नतदुक्तमस्तु
च्यतोयत्र विवक्षितार्थकिंचिन्न्यूनं तन्न्यूनं तदेवाकिंचिदधिकं सिद्धांताविरोधिपसिद्धांतः । प्रकृतेनुमानेप्रसंबद्ध
र्थवचनं अर्थांतरं उत्तराप्रतिक्रितिरप्रतिभा । परालिमतस्यार्थस्यस्वप्रतिकूलस्यस्वयमेवाभ्युपगमनं मतानुज्ञा ॥
इष्टार्थेनीविरोधः । इत्याद्यंतमप्रयुक्तारूपभेदानरूपभेदस्तुखेन नंतरीगाप्रतिपादनमिति । किंतुलोकानां तदज्ञा ॥
नदोषायलववति एतावतैवकत्पत्रि सिद्धेः॥ ॥वा ॥इति श्रीकेशवमिश्रविरचिततर्कपरिभाषा संपू
र्णा॥ ॥ ॥संवत॥१५२२ समये आश्विन वदि ३ र्णतिथौ रविवासरे॥ ॥शुभं भवतु॥ ॥ ॥